कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



प्रस्तावरत्नाकरप्रारंभः १

Acc. No. ~~2682~~ M·1594
Title - प्रस्तावरत्नाकर
Author - हरिदास (संवत् 1614)
Date - ?
Subject - विविधा, सुभाषित इ.
folio - 60.
Xerox - 120.

KKSU LIBRARY
RAMTEK
441 106
M-1594
Dist. Nagpur

Checked 2012

श्रीगणेशायनमः ॥ वंदेतंगणनाथमथेमनघंदारिद्रदावानलंशुंडादंडविधूयमानशामलं
संसारसिंधोस्तरिं ॥ यंनत्वासुरकोटयःप्रभुवरंसिद्धिंलभंतेपरंसिंदूरारुणविग्रहंपरिणयद्धा
नांबुधारावृतम् ॥ १ ॥ दरिद्रासस्य ॥ उच्चैर्ब्रह्मांडखंडद्वितयसहचरंकुंभयुग्मंदधानःप्रस्वन्ना
गारिपक्षप्रतिभटविकटश्रोत्रतालाभिरामः ॥ देवःशंभोरपत्यंभुजगपतितनुस्पर्द्धिवविष्णुहस्तस्त्रै
लोक्याश्चर्यमूर्त्तिःसजयतिजगतामीश्वरःकुंजरास्यः ॥ २ ॥ अन्यच्च ॥ याकुंदेंदुतुषारहारध
वलायाशुभ्रवस्त्रावृतायावीणावरदंडमंडितकरायाश्वेतपद्मासना ॥ याब्रह्माच्युतशंकरप्रभृ
तिभिर्देवैःसदावंदितासामांपातुसरस्वतीभगवतीनिःशेषजाड्यापहा ॥ ३ ॥ करबदरसदृशमखि
लंयत्प्रसादतःकवयः ॥ पश्यंतिसूक्ष्ममतयःसाजयतिसरस्वतीदेवी ॥ ४ ॥ अथकविवंशवर्णनं ॥
खारागटेमहाराज्येकरणःपुरुषोत्तमः ॥ आसीत्प्राज्ञःसतांश्रेष्ठोविख्यातविरुदःकृती ॥ ५ ॥ अभ

Checked 2012

वंस्तनयास्तस्यचत्वारोभूरितेजसा।। तेषांश्रेष्ठःकृष्णदासोगुणैःश्रेष्ठस्तुसत्तमः।।६।। तस्यानुजोम
हात्मानौदामोदरनारायणौ। कनिष्ठोहरिदासोभूद्विघ्नराजस्यसेवकः।।७।। ज्योतिःशास्त्रवृहत्कथास्मृति
कथाचानाक्यसामुद्रिकान्ग्रंथान्नृशाकुनपंचतंत्रचरकान्काव्यादिकांश्चापरान्।। आलोच्यप्र
यतंमुदेमतिभीत्यैवदुष्टात्मनां। विज्ञःश्रीहरिदासएषतनुतेप्रस्तावरत्नाकरम्।।८।। हरिदासस्यव
र्षे १६ १४ वेदरसारसेंदुकलितेमाघासितेपंचमीहस्तार्केवरवीरसाहिनृपतौश्रीमकुंठापत्तने
पुण्येनार्मदकोटितीर्थविषयेसंपूर्णतामागमद्विज्ञःश्रीपुरुषोत्तमात्मजकृतोप्रस्तावरत्नाकरः ९
अथानुक्रमणिका।। क्रियतेनुक्रमःस्पष्टःसुबोधार्थंसुभाषिते।। नीतिःप्रथमतोज्ञेयाराजनीतिस्ततःप
रम्।।१०।। अथप्रकीर्णकाख्यानमन्योक्तिश्चतथैवच।। धनप्रशंसाभि[illegible]सज्जनानांप्रशंसनम्।।११।।
उद्यमाख्यानकंचैवदैवाख्यानमतःपरं। दुर्जनानांतथानिंदाकूटाख्यानकमेवच।।१२।। सदाचारस्ततो

ज्ञेयोधर्माख्यानविमिश्रितः ॥ स्त्रीननिंदाप्रशंसेच्चतरूणांमहिमातथा ॥ १३ ॥ रागाख्यानंशाकुनकमथसामु
द्रिकंमतं ॥ स्वप्नाध्यायःकौतुकानियोक्तानिविविधानिच ॥ १४ ॥ ज्योतिःशास्त्रंततोज्ञेयंरत्नकोशास्तमुष्टतं
॥ ॥ इतिश्रीकरणकुलालंकारपुरुषोत्तमसूनुहरिदासविरचितेप्रस्तावर[illegible]करेअनुक्रमपरिछेदः ॥ १ ॥
अथनीतिः ॥ मित्रंस्वछंनयारिपूर्नलयवलेलेलुब्धेधनेरीश्वरंकार्येणद्विजमादरेणयुवतींप्रेम्णासमैर्वांधवान्
अत्युग्रंस्तुतिभिर्गुरुंप्रणतिभिर्मूर्खंकथाभिर्बुधंविद्याभिरसिकंरसेनसकुलंशीलेनकुर्याद्वशं ॥ १ ॥ अर्थी
लाघवमुछतोनिपतनंकामातुरोलांछनंनिःस्वावंचनमुन्मनाविकलतांशोकाकुलःसंशयं ॥ लुब्धोकी
र्तैमसंगरःपरिभवंदुष्टोन्यदोषंरतिंडवोगप्रियतांडरोधरवरःप्राप्नोतिकष्टंमुहुः ॥ २ ॥ नीतिर्भूमिभुजांनतिर्गु
णवतांह्रीरंगनानांधृतिर्दंपत्योःशिशवोगृहस्यकवितावुद्धेःप्रसादोगिरां ॥ लावण्यंवपुषःस्मृतिःसुमन
सांशांतिर्द्विजस्यक्षमाशक्तस्यद्रविणंगृहाश्रमवतांस्वास्थ्यंसतांमंडनं ॥ ३ ॥ धर्मःप्रयागेवचिंत्यःसर्
वमतिगतीभावेनीयंसदैवज्ञेयंलोकानुवृत्तंवरवरनयनेमंडलंवीक्षणीयं ॥ प्राछाद्योरागरोगोमृडउ

रुणरसोयोजनीयोन्वकालेऽमात्मायत्नेनरक्षोरणासिरसिपुनःसोपिनावेक्षणीयः॥४॥कार्पण्येनयशःकु
धागुणन्वयोदंभेनसत्यंक्षुधामर्यादाव्यसनैर्धनानिविपदास्थैर्यंप्रमादैर्द्विजः॥पैशुन्येनकुलंमदेनविनयो
श्री दुष्टयापौरुषंदारिद्र्येनजनादरोममतयास्वात्मप्रकाशोहतः॥५॥मूर्खोशांतस्तपस्वीक्षितिपतिरलसोम
त्सरोधर्मशीलोदुस्थोमानीगृहस्थःप्रभुरतिकृपणःशास्त्रविद्धर्महीनः॥आज्ञाहीनोनरेंद्रःस्तुचिरपिसततं
यःपरान्नोपभोजीवृद्धोरोगीदरिद्रःसवसुवतिपतितिद्विग्विडंवप्रकाराः॥६॥स्त्रीनांयौवनमर्थिनामनुगमोरा
ज्ञांप्रतापःसतांसत्यंस्वल्पधनस्यसंनतिरसहृत्तेस्तवाग्डंवरः॥साचारस्यमदाहृतंपरिणतेविद्याकुलस्यै
कतापूजायाधनमुन्नतेर्गुणवयःशांतेर्विवेकोवलं॥७॥विद्वान्संसदिपाक्षिकःपरवशोमानीदरिद्रोगृहीद्रव्य
द्युःकृपणःसुखीपरवशोवृद्धोनृतीर्थाश्रयः राजादुःसचिवप्रियःकुलभवोमूर्खःपुमान्स्त्रीजितोवेदांतीहृतस
तक्रियःकिमपरंहास्यास्पदंभूतले॥८॥शांतिश्चेत्कवचेनकिंकिमरिभिःक्रोधोस्तिचेद्देहिनांज्ञातिश्चेदनगेकिं
यदिसुहृद्दिव्यौषधैःकिंफलं॥ किंसर्पैर्यदिदुर्जनःकिमुधनैर्विद्यानवद्यायदिव्रीडाचेत्किमुभूषणेनकविताय

किं

घस्तिराज्येनकिं ९ नवरलस्य स्वर्गःकिंयदिवल्लभानिजवधूःकिंवाविरूपायदिलावण्यंयदिकिंसुधाः
रकवैःशृंगारगर्भोगिरः मत्युःयदिनिर्गुणोप्यनुगतिःकिंधिग्यदिप्रार्थनायाशार्थैःकृनिकेतनोयदिभवान्नकिं
कल्पभूमीरुहैः १० वित्तेनकिंवितरणंयदिनास्तिदीनेकिंसेवयायदिपरोपकृतोनयत्नैः किंसंगमेनत
नयोयदिनेक्षणीयःकिंयौवनेनविरहोयदिवल्लभाया ११ नागोभातिमदेनकंजलरुहैःपूर्णेंदुनाश
र्वरीशीलेनप्रमदाजवेनतुरगानित्योत्सवैर्मंदिरं वाणीव्याकरणेनहंसमिथुनैर्नद्यःसभापंडितैःसत्पुत्रे
णकुलंत्वयावसुमतीलोकत्रयंविष्णुना १२ लोभश्चेदगुणेनकिंपिशुनतायद्यस्तिकिंपातकैःसत्यंचे
त्तपसाचकिंशुचिमनोयद्यस्तितीर्थेनकिं सौजन्यंयदिकिंगुणैःसुमहिमायद्यस्तिकिंमंडनैःसद्विद्यायदिकिंध
नैरपयशोयद्यस्तिकिंमृत्युना १३ मांसंमृगाणांदशनौगजानांमृगद्विषांचर्मफलंद्रुमाणां स्त्रीणांहि
रूपंचनृणांहिरण्यमेतेगुणावैरकराभवंति १४ लब्धस्यतियशोविषमस्यमैत्रीनष्टस्यकृपणस्यकुल
मर्थपरस्यधर्मः विद्याफलंव्यसनिनःकृपणस्यनामराज्यंप्रमत्तसचिवस्यनराधिपस्य १५ सार्थेनमित्रं
कृपटेनधर्मं [illegible] समृद्धिभावं सुखेनविद्यापुरुषेणनारीवांछंतियेव्यक्तमपंडितास्ते १६ धातु

वादेषुवित्ताशामोक्षाशाकौलिकेमते आमातरिच्चपुत्राशात्रयमेतन्निरर्थकं १७ वैद्यंपानरतंनटंकुपठि
तंस्वाध्यायहीनंद्विजंयोधंकापुरुषंहयंगतरयंमूर्खंपरिव्राजकं राज्यंबालनृपंचमंत्ररहितंमैत्रंछलान्वे
षिपद्भार्यांयौवनगर्वितांपररतांमुंचंतितेपंडिताः १८ सूनुःसच्चरितःसषीसहचरीस्वामीप्रसादोन्मुखःस्निग्धो
बंधुरवंचकःपरिजनोनिःक्लेशलेशंमनः आकारोरुचिरःस्थिरश्चविभवोविद्यावदातंमुखंतुष्टेविष्टपकष्टहा
रिणिहरौसंपद्यतेदेहिनां १९ शीलावलंबनमदर्निशमिष्टचिंतावित्तानुरूपमशनाभरणादिकार्यं वा
र्योच्चदुर्जनसमाजनिजप्रशंसाहास्यादिसज्जनवचोहृदयेनिधेयं २० योपमर्थंप्रार्थयतेयदर्थंघटतेचनरः
अवश्यंतदवाप्नोतिनचेछ्रांतोनिवर्तते २१ अविधेयाभृत्यजनाःशठानिमित्राण्यदायकःस्वामी अवि
नयवतीचभार्यामस्तकशूलानिचत्वारि २२ नालसाःप्राप्नुवंत्यर्थान्नशठानचमानिनः नचलोकरवाद्भीता
नचैवप्रकृतीक्षणः २३ शक्तिरहितोपिकुप्यतिसेवाशक्तोपिमानमुद्वहति अधनोपिहिकामयतेजानाति
विधिर्विडंबयितुं २४ कितवायंप्रशंसंतियंप्रशंसंतिचारिणः वंधक्यायंप्रशंसंतिसपार्थपुरुषाधमः २५
राजानोयंप्रशंसंतियंप्रशंसंतिचद्विजाः साधवोयंप्रशंसंतिसपार्थपुरुषोत्तमः २६ गुणाःसर्वज्ञकल्पोपि

7

सीदत्येकोनिराश्रयः अनर्घ्यमपिमाणिक्यंहेमाश्रयमपेक्षते २७ गुणोदूषणतांयातिदूषणंगुणतांक्वचि
त् तथाहिनम्रतोदोषःस्तनयोस्तब्धतागुणः २८ यस्यचाप्रियमन्विछेतस्यकुर्यात्सदाप्रियं व्याधोमृगव
धंकर्तुंसम्यग्गायतिसुस्वरं २९ सप्तैतानिनपूर्यंतेपूर्यमानान्यपिक्वचित् ब्राह्मणोग्नियमोराजापयो
धिरुदरंगृहं ३० चिबुकेयस्यलोमानिनवक्षसिवगेद्वयोः तेनसख्यंनकुर्वीतयदिनिर्मानुषंजगत्
३१ नदीनांचनखीनांचशृंगिणांशस्त्रपाणिनां विश्वासोनैवकर्तव्यःस्त्रीराजकुलेषुच ३२ यौ
वनंधनसंपत्तिःप्रभुत्वमविवेकता एकैकमप्यनर्थायकिमुयत्रचतुष्टयं ३३ विद्याशस्त्रस्य
शास्त्रस्यद्वेविद्येप्रतिपत्तये आद्याहासायवृद्धत्वेद्वितीयाद्रियतेसदा ३४ सुजीर्णमन्नंसुवि
चक्षणःसुतःसुशासितास्त्रीनृपतिःसुसेवितः सुचिंत्यचोक्तंसुविचार्ययत्कृतंसुदीर्घकालेपिन
यांतिविक्रियं ३५ दाक्षिण्यंस्वजनेदयापरिजनेशाठ्यंजनेदुर्जनेप्रीतिःसाधुजनेस्मयःखलज
नेविद्वज्जनेप्राजेवं शौर्यंशत्रुजनेक्षमागुरुजनेनारीजनेधूर्तताये त्वेवंपुरुषाःकलाःसुकुस

लास्तेषांचलोकेस्थितिः ३६ वांछंसज्जनसंगमेपरगुणेप्रीतिर्गुरौनम्रता विद्यायांव्यसनंस्वयो
षितरतिर्लोकापवादाद्भयं भक्तिःशूलिनिशक्तिरात्मदमनेसंसर्गमुक्तिःखलेह्येतेयेषुवसंतिनिर्म
लगुणास्तेभ्योनरेभ्योनमः ३७ नगणस्याग्रतोगच्छेत्सिद्धेकार्येसमंफलं यदिकार्येविपत्तिःस्या
न्मुखरस्तत्रहन्यते ३८ अर्थनाशंमनस्तापंगृहेदुश्चरितानिच वंचनंचापमानंचमतिमान्नप्र
काशयेत् ३९ ऐश्वर्यस्यविभूषणंसुजनताशौर्यस्यवाक्संयमोज्ञानस्योपशमःकुलस्यविनयोवि
त्तस्यपात्रेव्ययः अक्रोधस्तपसःक्षमाप्रभवतांधर्मस्यनिर्व्याजतासर्वेषामपिसर्वकारणमिदंशीलंपरं
भूषणं ४० जलबिंदुनिपातेनक्रमशःपूर्यतेघटः सहेतुःसर्वविद्यानांधर्मस्यचधनस्यच ४१ यो
ध्रुवाणिपरित्यज्यअध्रुवंचनिसेविते ध्रुवानितस्यनंस्यंतिअध्रुवंनष्टमेवच ४२ प्रस्तावसदृशंवा
क्यंसद्भावसदृशंप्रियं आत्मशक्तिसमंकोपंयोजानातिसपंडितः ४३ कोर्थान्प्राप्यनगर्वितोविषयि
नःकस्यापदोस्तंगताःस्त्रीभिःकस्यनखंडितंभुविमनःकोनामराज्ञांप्रियः कःकालस्यनगोचरांतरग

तः कोर्थीगतोगौरवं कोवाउर्जनवागुरासुपतितः क्षेमेनजातः पुमान् ४४ बंधुः कोनामदुष्टानां कोप्येत्त
कोनातियाचितः कोनतृप्यतिवित्तेनकुरुतेकोनपंडितः ४५ सेवितव्योमहान्वृक्षः फलछायासमन्वितः
यदिदैवात्फलंनास्तिछायाकेननिवार्यते ४६ वृक्षंक्षीणफलंत्यजंतिविहगाः शुष्कंसरः सारसाः पुष्पंपीत
रसंत्यजंतिमधुपादग्धंवनांतंमृगाः । निर्द्रव्यंपुरुषंत्यजंतिगणिकाभ्रष्टंनृपंमंत्रिणः कार्याकार्यवशंगतो
भिरमतेकः कस्यकोवल्लभः ४७ मौनान्मूकः प्रवचनपटुर्वातुलोजल्पकोवाधृष्टः पार्श्वेभवतिचजनोदूर
तश्चाप्रमादी क्षांत्याभीरुर्यदिनसहतेप्रायशोनाभिजातः सेवाधर्मः परमगहनोयोगिनामप्यगम्यः ४८
दौर्मंत्र्यान्नृपतिर्विनश्यतियतिसंगात्सुतोलालनाद्विप्रोनध्ययनात्कुलंकुतनयाच्छीलंखलोपासनात् ह्री
र्मद्यादनवेक्षणादपिकृषिःस्नेहःप्रवासाश्रयान्मैत्रीचाप्रणयात्समृद्धिरणयात्त्यागात्प्रमादाद्धनम् ४९ प्री
णातियः सुचरितैः पितरंसपुत्रोयद्भर्तुरेवहितमिच्छतितत्कलत्रं तन्मित्रमापदिसुखेचसमक्रियंयदेतत्त्रयंज
गतिपुण्यकृतोलभंते ५० धनेनकिंयोनददातिनाश्नुतेबलेनकिंयश्चरिपून्नबाधते श्रुतेनकिंयेननधर्ममा
चरेत्किमात्मनायोनजितेंद्रियोभवेत् ५१ राजाघृणीब्राह्मणःसर्वभक्षःस्त्रीचावशादुःप्रकृतिःसहायः॥

मेरुः प्रीतियः प्रकृतिः प्रमादी स्याज्ज्याऽभीयश्चकृतंनवेति ५२ काविद्याकवितांविनार्थिनिजने
दानंविनाश्रीश्चकोधर्मः कृपयाविनाक्षितिपतिः कोनामनीतिंविना कःसूनुर्विनयंविनाकुलवधूः
कास्वामीभक्तिंविनाभोग्यंकिंरमणींविनाजनिजुषः किंजन्मकीर्त्तिंविना ५३ यस्यनास्तिस्वयंप्र
ज्ञाशास्त्रंतस्यकरोतुकिं लोचनाभ्यांविहीनस्यदर्पणः किंकरिष्यसि ५४ दारिद्रताधीरतयाविरा
जतेकुरूपतयाशीलतयाविराजते कुभोजनंचोष्णतयाविराजतेकुवस्त्रतासुभ्रतयाविराजते॥
५५ कर्मायत्तंफलंपुंसांबुद्धिःकर्मानुसारिणी तथापिसुबुद्ध्याभाव्यंसुविचार्यैवकुर्वता ५६
जिताधनवतादारावस्त्रशास्त्रजितासभा जितंकृषिभिर्दारिद्र्यंगोभिरभ्यागतोजितः ५७ क्षमाथ
नुगृहीतस्यदुर्जनः किंकरिष्यसि अतृणेपतितोवह्निः प्रकोपायनशांतये ५८ पठतोनास्तिमूर्खत्वं
जपतोनास्तिपातकं मौनिनःकलहोनास्तिनास्तिजागरतोभयं ५९ आज्ञाभंगोनरेंद्राणांविप्राणां
मानखंडनं पृथक्शय्यावरस्त्रीणामशस्त्रवधमुच्यते ६० वरंपलितकायेनकर्त्तव्यःश्रुतिसंग्रहः॥

प्र.र. नतत्रधनिनोयांतियत्रयांतिबहुश्रुता ६१ विश्वासप्रतिपन्नानांवंचनेकाविदग्धता अंकमारुह्यसुप्त
६ स्यहंतुःकिंनामपौरुषं ६२ सर्वस्यद्वेसुमतिकुमतीसंपदापत्तिहेतूवृद्धोयूनासहपरिचयात्त्याज्यतेकामि
नीभिः एकेगोत्रेसभवतिपुमान्यःकुटुंबंविभर्त्तिस्त्रीपुंवच्चप्रभवतियदातद्धिगेहंविनष्टं ६३ पठकः
पाठकश्चैवयेचान्येशास्त्रचिंतकाः सर्वेव्यसनिनोमूर्खाःयःक्रियावान्सपंडितः ६४ परोपदेशकुशला
दृश्यंतेबहवोनराः स्वभावमनुवर्त्तंतेसहस्रेष्वपिदुर्लभा ६५ अग्निहोत्रफलावेदाःशीलवृत्तफलंकुलं
रतिपुत्रफलादारादत्तभुक्तफलंधनं ६६ गुणोभूषयतेरूपंशीलंभूषयतेकुलं सिद्धिर्भूषयतेविद्यांभोगो
भूषयतेधनं ६७ आपत्सुमित्रंजानीयाद्युद्धेशूरंधनेशुचिं भार्यांक्षीणेषुवित्तेषुव्यसनेषुचबांधवान्
६८ शास्त्रंसुचिंतितमपिप्रतिचिंतनीयमाराधितोपिनृपतिःपरिशंकनीयः अंकेस्थितायुवतयाच
परिरक्षणीयाःशास्त्रेनृपेचयुवतौचकुतोवशित्वं ६९ नाग्निस्तृप्यतिकाष्ठानांनापगानांमहोदधि राम
नांतकःसर्वभूतानांनपुंसांवामलोचनाः ७० नाजारजःपितृद्वेषीनाजाराभर्तृवैरिणी नालंपटोऽ
धिकारीस्यान्नाकामीमंडनप्रियः ७१ काकेशौचंद्यूतकारेषुसत्यंक्लीवेधैर्यंमद्यपेतत्त्वचिंता सर्पे ६

क्षांतिःस्त्रीषुकामोपशांतिःराजामित्रंकेनदृष्टंस्तुतंवा ७२ असंतुष्टाद्विजानष्टाःसंतुष्टश्चमही
पतिः सलज्जागणिकानष्टानिर्लज्जाश्चकुलांगना ७३ दुर्मंत्रिणंकमुपयांतिननीतिदोषाःसं
तापयंतिकमपथ्यभुजंनरोगाः कंश्रीनर्दपयतिकंननिहंतिमृत्युःकंस्त्रीकृतानविषयाःपरिताप
यंति ७४ स्त्रीविनश्यतिरूपेणब्राह्मणोराजसेवया गावोदूरप्रचारेणहिरण्यंलोभलिप्सया
७५ किंचित्रंयदिवेदशास्त्रनिपुणोविप्रोभवेत्पंडितःकिंचित्रंयदिनीतिशास्त्रनिपुणोराजाभवेद्धर्मिणः
नचित्रंयदिरूपयौवनवतीसाध्वीभवेत्कामिनीयतच्चित्रंयदिनिर्धनोहिपुरुषःपापंनकुर्यात्क्वचित् ७६
अन्यदाभूषणंपुंसःक्षमालज्जेवयोषितः पराक्रमःपरिभवेवैजात्यंसुरभेष्विव ७७ अचलाकम
लाकस्यकस्यमित्रंमहीपते शरीरंचस्थिरंकस्यकस्यवरांगना ७८ गर्द्दभःपटहोदासीग्रामण्यःपश
वःस्त्रियः दंडेनाक्रम्यभुंजीयान्नतेसन्मानभाजनं ७९ बहुभिर्नविरोधव्यंदुर्जनैःस्वजनैरपि स्फु
रंतमपिनागेंद्रंभक्षयंतिपिपीलिका ८० विषादप्यमृतंग्राह्यंबालादपिसुभाषितं नीचादप्युत्तमां
विद्यांस्त्रीरत्नंदुष्कुलादपि ८१ विवादोधनसंबंधोयाचनंस्त्रीषुसंगतिः आदानमग्रस्थायित्वंमैत्री

भ.र.
७

भंगस्यहेतवः ८२ नभोजनविलंबीस्यान्नचनारींनिवंधनं सुदूरमपिविद्यार्थीव्रजेद्गरुडहंसव
त् ८३ युक्तियुक्तंप्रगृह्णीयाबालादपिविचक्षणः रवेरविषयेवस्तुकिंनदीपःप्रकाशयेत्
८४ अवृत्तिकंत्यजेदेशंवृत्तिंसोपद्रवांत्यजेत् त्यजेन्मायाविनंमित्रंधनंप्राणहरंत्यजेत् ८५
संतव्योमंदबुद्धीनामपराधोमनीषिणः नहिसर्वत्रपांडित्यंसुलभंपुरुषेक्वचित् ८६ व्यसने
मित्रपरिक्षाशूरपरिक्षारणांगणेभवति विनयेवंशपरीक्षाचदानपरिक्षाचदुर्भिक्षे ८७ भूमिपता
वेथपतौबालेवृद्धेतपोधिकेविदुषि योषितमूर्खगुरुषुदेवाचविदुषानेवोत्तरंदेयं ८८ राजा
पश्यतिकर्णाभ्यांयुक्त्यापश्यतिपंडितः पशुःपश्यतिगंधेनभूतेपश्यतिचक्षुसाः ८९ त्यजेभय
मकृतपापांमैत्रीतुशठंप्रमादिनांविद्या स्त्रीकामिनंमलसंश्रीःक्रूरंस्त्रीदुर्जनंलोकः ९० हस्तीस्थूल
तरःसचांकुशवशःकिंहस्तितुल्योंकुशोदीपेप्रज्वलितेविनश्यतितमःकिंदीपतुल्यंतमः वज्रेनाभिह
तःपतंतिगिरयःकिंवज्रतुल्योगिरिर्बुद्धिर्यस्यगरीयसीसवलवान्स्थूलेषुकःप्रत्ययः ९१ प्रस्तु

ति
राम
७

दुः सर्वसिद्धीनांमुन्नायः प्रथमं. किल   अतिशीतलमप्यंतःकिंभिनत्तीनभूभृतः ९२ प्रत्यक्षेगुरुणा
जानोपरोक्षेमित्रबांधवाः   प्रत्यक्षेचपरोक्षेचानस्तुतिःपुत्रदारयोः ९३ गुणवानपिनोपयातिपूजां
जनमध्येसुजनैरकथ्यमानः   नहिशोरमणिःस्वभावकांतिंरविपादैरणधिष्ठितःकरोति ९४ उपका
रकुमायतेभृशंप्रभवःकर्मफलस्यभूरिणः   अनपायिनिबर्हणंद्विषांनतितिक्षासममस्तिसाधनं ९५
सर्वसहायेऋजवःप्रतिज्ञातार्थपालकाः   परोपकारिणःसेव्यानिर्धनाअपितेनराः ९६ अर्थागमोनित्य
मरोगिताचप्रियाचभार्याप्रियवादिनीच   वश्यश्चपुत्रोर्थकरीचविद्याषड्जीवलोकस्यसुखानितानि ९७ को
र्थःपुत्रेणजातेनयोनविद्वान्नधार्मिकः   काणेनचक्षुषाकिंवाचक्षुःपीडैवकेवलं ९८ गुणिगणगणनारं
भेपतातिनकठिनीसुसंभ्रमायस्य   तेनांबायदिसुतिनीवदवंध्याकीदृशीभवति ९९ काव्यशास्त्रविनोदेन
कालोगच्छतिधीमतां   व्यसनेनतुमूर्खाणांनिद्रयाकलहेनवा १०० उचितमनुचितंकुर्वताकार्यमादौप
रिणतिरवधार्यायत्नतःपंडितेन   अतिरभसकृतानांकर्मणामाविपत्तेर्भवतिहृदयदाहीशल्यतुल्योवि
पाकः १ यशोधिगंतुंसुखलिप्सयावामनुष्यसंख्यामतिवर्त्तितुंवा   निरुत्सुकानामभियोगभाजांसमुत्सु

केवांकमुपैतिसिद्धिः २ कोतिभारःसमर्थानांकिंदूरंव्यवशायिनं कोविदेशःसुविद्यानांकःपरःप्रियवा
दिनां ३ अव्यापारेषुव्यापारंयोनरःकर्तुमिच्छति सतत्रनिधनंयांतिकीलोत्पाटीववानरः ४ अभ्र
छायाखलप्रीतिर्नवसस्यानियोषितः किंचित्कालोपभोग्यानियौवनानिधनानिच ५ आरोप्यतेशिला
शैलेयथायत्नेनभूयसा निपात्यतेक्षणेनाधस्तथात्मगुणदोषतः ६ हतंज्ञानंक्रियाहीनंहतश्चाज्ञानि
नोनराः हतंचानायकंसैन्यंअभर्तारोहतास्त्रियः ७ कन्यानिष्कासिताश्रेष्ठावधूःश्रेष्ठाप्रवेशिता अप
त्नंसंग्रहितंश्रेष्ठोधर्मःश्रेष्ठोदिनेदिने ८ भिन्नेचित्तेकुतःप्रीतिःअप्रीतिःकुतःसुखं स्त्रियाचपुत्रशोक
श्चपुच्छछेदीमयास्मृतः ९ त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् ग्रामंजनपदस्यार्थेआत्मार्थेपृथि
वींत्यजेत् १० अजरामरवत्प्राज्ञोविद्यामर्थंचचिंतयेत् गृहीताइवकेशेषुमृत्युनाधर्ममाचरेत् ११
स्वायत्तमेकांतहितंविधात्राविनिर्मितंछादनमज्ञतायाः विशेषतःसर्वविदांसमाजेविभूषणंमौनमपं
डितानां १२ अनुकूलेविधौदेयंयतःपूरयिताहरिः प्रतिकूलेविधौदेयंयतःसर्वंहरिष्यति १३
सुखार्थीसंत्यजेद्विद्यांविद्यार्थीसंत्यजेत्सुखं सुखिनस्तुकुतोविद्याकुतोविद्यार्थिनःसुखं १४ गुरौ

गोरवमायातिनमहत्स्यापिसंपदा पूर्णोऽपिनातथावंधोनिःकेलंकोयथाकश १५ सत्यंसत्यंपुने
र्वाक्यंनादत्तमुपतिष्ठति अंबुभिःपूरितापृथ्वीचातकस्यमरुस्थली १६ धनेषुजीवतव्येषुस्त्रीषु
भोजनवृत्तिषु अतृप्ताःमानवाःसर्वेयातायास्यंतियांतिते १७ संभोजनंसकथितंसंप्रश्नोयसमाग
मः ज्ञातिभिःसहकार्याणिनविरोधःकदाचनः १८ जीर्णमन्नंप्रशंसीयाद्भार्यांचगतयौवनं रणाप्र
त्यागतंशूरंधान्यंचगृहमागतं १९ नखड्गेनजयेन्निद्रांनकामेनस्त्रियंजयेत् नेंधनेनजयेद्वह्निंन
पानेनसुरांजयेत् २० कःशूरोविजितेंद्रियःप्रियतमाकानुव्रताकिंधनंविद्याकिंसुखमप्रवासवसतीराज्यं
किमाज्ञापरं कोलाभोगुणिसंगमःकिमसुखंप्राज्ञेतरैःसंगतिःकाहानिःसमयच्युतिर्निपुणताकाधर्मतत्वे
रतिं २१ वयसिगतेकःकामविकारःक्षीणेवित्तेकःपरिवारः शुष्केनीरेकःकासारः ज्ञातेतत्वेकःसंसारः
२२ अतिपरिचयादवज्ञासततगमनादनादरोभवति लोकप्रयागवासीकूपेःस्नानंमाचरति २२ कु
भोज्येनदिनंनष्टंकुकलत्रेणशर्वरी कुपुत्रेणकुलंनष्टंतनष्टंयन्नदीयते २४ दर्शितानिकलत्राणिगृहेभुक्तं
मशंकितं कथितानिरहस्यानिमित्रेषुलोकेषुभिद्यते २५ नद्रूहंयत्रवसततद्भोज्यंयेनजीवति यस्तुक्तेयेतदे

कोत्कं ज्ञानमज्ञानमन्यथा २६ अजायुद्धंवणिकुश्राद्धंप्रत्यूषेमेघडंबरं दंपत्योकलहश्चैवपरिणामेनकिं
चन २७ द्वाविमौपुरुषौलोकेशिरःशूलकरौपरौ गृहस्थश्चनिरारंभोयतिश्चसपरिग्रहः २८ अनायके
नवास्तव्यंनवसेद्बहुनायके स्त्रीनायकेनवास्तव्यंनवसेद्बालनायके २९ पंचयत्रनविद्यंतेनतत्रदि
वसंवसेत् धनिकःश्रोत्रियोराजानदीवैद्यस्तुपंचमः ३० इतिश्रीकरणकुलालंकारपुरुषोत्तमसू
नुहरिदासविरचितेप्रस्तावरत्नाकरेनीतिःसमाप्तः १ अथराजनीतिः प्रथमंराज्ञप्रशंसामाह
॥ बालोपिनावमंतव्योमनुष्यइतिभूपतिः महतीदेवताह्येषानररूपेणसंस्थिता १ यस्यप्रसादेप
द्माश्रीर्विजयश्चपराक्रमे मृत्युश्चवसतिक्रोधेसर्वतेजोमयोहिसः २ अशुचिर्वचनाद्यस्यशुचिर्भ
वतिपूरुषः शुचिश्चैवाशुचिश्चैवकथंराजानदेवता ३ निकटस्थंदहत्यग्निर्नृतुदूरापिसर्पिनं
कुलंदहतिराजाग्निःसपशुद्रव्यबांधवं ४ रक्षाधिकारीदीशाखाद्भूतानुग्रहकारणात् यदेवकुरु
तेराजातत्प्रमाणमितिस्थितिः ५ राजानामचरत्येवभूमौसाक्षात्सहस्रदृक् नतस्यज्ञामतिक्रम्यप्र
तिष्ठंपरिमाप्रजाः ६ राज्ञाणाज्ञाभयाद्धर्मानव्यपैतेयथाप्रजाः व्यवहारस्ततोज्ञेयःसंश्रितोरा

जशासनं ७ स्थित्यर्थंपृथिवीपालैश्चारित्रविधयःकृताः चरित्रेभ्यःततःप्राकुर्गरीयोराजशास
नं ८ प्रजांसंरक्षतिनृपःसावर्द्धयतिपार्थिवं वर्द्धनाद्रक्षणंश्रेयस्तन्नाशेन्यत्सदप्यसत् ९ नृपा
णांचनराणांचकेवलंतुल्यमूर्त्तिता आधिक्यंचक्षमाधैर्यमाज्ञादानंपराक्रमः १० सदानुरक्तःप्रकृतिःप्र
कृतिःप्रजापालनतत्परः विनीतात्माहिनृपतिर्भूयसींश्रियमस्तुते ११ प्रजापीडनसंतापात्समुद्भूतोहु
ताशनं राज्ञाकुलंश्रियंप्राणान्नादग्ध्वाविनिवर्त्तते १२ निर्विषोपियथासर्पःफणाटोपोभयंकरः त
थैवाडंबराज्ञाजानपरैरभिभूयते १३ पुष्पैरपिनयोद्धव्यंकिंपुनर्निशितैःशरैः जयेभवतिसंदेहःप्र
धानपुरुषःक्षयः १४ उपकारगृहीतेनशत्रुणाशत्रुमुद्धरेत् पादलग्नंकरस्थेनकंटकेनेवकंटकं १५
नोवीक्षितव्योविद्वद्भिःशत्रुरल्पोप्यवज्ञया वह्निरल्पोपिसंवृद्धःकुरुतेभस्मसाधनं १६ कूर्मसंको
चमास्थायप्रहारमपिमर्षयेत् प्राप्तकालेतुनीतिज्ञःउत्तिष्ठेक्रूरसर्पवत् १७ तावद्भयस्यभेतव्यंया
वद्भयमनागतं आगतंतुभयंदृष्ट्वाप्रहर्त्तव्यमभीतवत् १८ परोपिहितवान्बंधुर्बंधुरप्यहितःपरः
अहितोदेहजोव्याधिर्हितमारण्यमौषधं १९ मास्वंतोलखबलेस्थित्वाबाधिष्टाउबलंजनं नहिदुर्वेल

प्र.र.
१०

दग्धानांकुलंकिंचिन्नरोहति २० उत्खातान्प्रतिरोपयन्विचिन्वन्लघुन्वर्धयन्नुत्तुंगान्नमयंनतांसमुदयं
विश्लेषयन्संहतान् क्षुद्रान्कंटकिनोबहिर्नियमयन्म्लानान्समुच्चेचयन्मालाकारइवप्र
योगनिपुणोराजाचिरंनंदति २१ कमंडलूपमोमत्यस्तनुस्यागोबहुग्रहः नृपतेःकिंक्ष
णोमूर्खःदरिद्रःकिंवराटकः २२ वेदवेदांगतत्वज्ञोजपहोमपरायणः आशीर्वादपरोनि
त्यमेषराज्ञःपुरोहितः २३ क्रमागतोहितमतिःसर्वभावपरिक्षकः धीरोयथोक्तवादीचदू
तएवंविधोमतः २४ प्रवीणोवाक्यबुद्धीमान्स्वामिभक्तश्चनित्यशः अलुब्धःसत्यवा
दीचभांडागारकइष्यते २५ इंगिताकारतत्वज्ञोबलवान्प्रियदर्शनः समयज्ञःस्वामि
भक्तःप्रतीहारीसउच्यते २६ मंत्रेतंत्रार्पितप्रीतिर्देशकालोचितस्थितिः यश्चराज्ञोभवेद्भ
क्तःसोमात्यःपृथिवीपते २७ यस्मिन्नैवाधिकंचक्षुरारोपयतिपार्थिवः कुलीनोवाकुली
नोवासंश्रियोभोजनंभवेत् २८ विषहीनोयथानागोमदहीनोयथागजः सर्वेषांवश्यतांया

तिदुर्गोहीनस्तथान्नृपः २९ दुर्गोबहुविधंज्ञेयंपर्वतस्यजलस्यच प्राकारस्यचतस्यापिभूमेरपि
भवेत्क्वचित् ३० नगजानांसहस्रेणनलक्षेणचवाजिनां तथासिध्यंतिकार्याणियथादुर्गप्रभा
वतः ३१ शतमेकोपिसंधत्तेप्राकारस्थोधनुर्द्धरः तस्माद्दुर्गंप्रशंसंतिनीतिशास्त्रविदोजनाः ३२
प्रज्ञाशुभ्रशरीरस्यकिंकरिष्यंतिसंहताः गरदीनछत्रहस्तस्यवारिधाराइवारयः ३३ मातातस
पदामग्रमारूढोस्मीतिविश्वसीः दूरारूढपरिभ्रंशोविनिपातोदिदारुणः ३४ क्वचित्कार्यवशा
न्नीचोप्यस्तंभवतिनोमहान् कांसस्येवहिराज्ञोपिदर्पणःकनकेस्यच ३५ क्रूरंव्यसनिनंलु
ब्धंमप्रगल्भमथाकुलं मूर्खमन्यायकर्त्तारंनाधिपत्येनियोजयेत् ३६ रिक्ताःकर्मनिपरवःस्त
ध्यस्त्वलसाभवंतिजेभृत्याः तेषांजलौकसामिवपूर्णानांखलुरिक्तताकार्याणि ३७ नियोगिभिर्विनाराज्यंनास्ति
भूपोहिकेवलं तस्मादमीविधातव्याःरक्षितव्याप्रयत्नतः ३८ कानाकुब्जाश्चषंढाश्चतथावृद्धाश्चपंगवः
एतेचांतःपुरेनित्यंनियोक्तव्याःसमाहृताः ३९ धर्मशास्त्रार्थकुशलाःकुलीनाःसत्यवादिनः समाशत्रौच

प्र.र.
११

मित्रेचनृपतेस्युःसभासदा ४० नसासभायत्रनसंतिवृद्धावृद्धानतेनवदंतिधर्मं: नासोधर्मोयत्रचनास्ति
सत्यंनतत्सत्यंयछलेनानुवृद्धं ४१ मंत्रिणांभिन्नसंधानेभिषजांसान्निपातिके कर्मणिव्यवत्तेप्रज्ञासु
स्थःकोवानपंडितः ४२ नरपतिहितकर्त्ताद्वेष्यतांयातिलोकेजनपदहितकर्त्तामुच्यतेपार्थिवेंद्रैः ॥
इतिमहतिविवादेवर्त्तमानेनृपतिजनपदानांदुर्लभःकार्यकर्त्ता ४३ तुल्यार्थंतुल्यसामर्थ्यंमर्म्मज्ञंव्य
वसायिनं अर्द्धराज्यहरंभृत्यंयोनहन्यात्सहन्यते ४४ प्रसादोनिष्फलोयस्ययस्यक्रोधोनिरर्थकः ॥
नतंभर्त्तारमिच्छंतिषंढापतिरिवांगना ४५ अविवेकिनिभूपालेनश्यंतिगुणिनोगुणाः चित्तोत्साहःपुरं
ध्रीनांभर्त्तरीवनपुंसके ४६ जीवंतोपिमृतापंचव्यासेनपरिकीर्त्तिताः दरिद्रोव्याधितोमूर्खःप्रवासीचि
रसेवकः ४७ चक्रसेव्यंनृपःसेव्योमानृपश्चक्रवर्जितः पश्यच्चक्रस्यमाहात्म्यंमृत्पिंडःपात्रतांगतः ४८
गंतव्यंराजसदनंद्रष्टव्याराजपूजिताःलोकाः यद्यपिनभवंत्यर्थास्तथाप्यनर्थाविनश्यंति ४९ अ
त्यासन्नंविनाशायदूरतस्थाफलप्रदाः मध्यभावेनसंसेव्याराजावह्निर्गुरुस्त्रियः ५० आसन्नमेवनृप
तिर्भजतेमनुष्यंविद्याविहीनमकुलीनमसंगतंवा प्रायेणभूमिपतयःप्रमदालताश्चयःपार्श्वतोभवति

तंपरिवेष्टयंति ५१ अभिमतोप्यवज्ञातोयोराज्ञांद्वारतिष्ठति सतुराज्ञांश्रियंभुंक्ते नाभिमानीकदा
चन ५२ राजमातरिदेव्यांचकुमारेमुख्यमंत्रिणी पुरोहितेप्रतीहारेसमंवर्त्तेतराजवत् ५३ आया
चतुर्थभागेनव्ययकर्मप्रवर्त्तेत प्रभूततैलदीपोपिचिरंभद्राणिपश्यति ५४ अर्थानामर्थनंकार्यं
वर्द्धनंरक्षणंतथा भक्ष्यमाणोनिरादायःसुमेरुःक्षीयतेपिहि ५५ आक्षेपवचनंकस्यनवक्तव्यंक
दाचन अनुकूलंप्रियंचास्यवक्तव्यंजनसंसदि ५६ अंतःपुरधनाध्यक्षैर्वैरीभूतैर्निराकृतैः संस
र्गंनव्रजेल्लोकेविनापार्थिवशासनं ५७ जृंभंनिष्ठीवनंकासंकोपंपर्यंकिकाश्रयं भ्रूकुटीवातमुद्गारंचतत्
समीपेविवर्जयेत् ५८ स्वयंतथानकर्त्तव्यंस्वगुणाख्यापनंपुनः स्वगुणाख्यापनंयुक्त्यापरद्वाराप्रयोज
येत् ५९ राज्ञस्तुदर्शनंकुर्याज्ज्ञात्वावसरसौष्ठवं गुणादिख्यापनापूर्वउपनीतोसहाशयैः ६० दर्शनेनाथ
मद्वाराराज्ञःकार्येविपश्चितां गरिष्ठोप्यतियत्नेनश्रेष्ठउपनीतोलघीयसा ६१ आशयंमहतःसोयंमनिमज्ञाति
सर्वथा कोपनासत्तुसंवदाउपनीतोनलेनयः ६२ प्रस्ताववाक्यमुदितेनैवसंभाव्यतेयथा आराधनासुसर्वा
सुप्रसुप्तइवचेष्टते ६३ कथाप्रसंगेप्रक्षिप्तमतिकथंभंगंकरोतिच लक्ष्यतेविमुखश्चैवगुणसंकीर्त्तनेकृते ६४

प्र.र.

१२

शत्रोरत्यंतमित्रोंयस्तेनमैत्रींविवर्जयेत् अर्जयेन्नद्विराजेनतत्तृष्टाघातकारिणा ६५ संगतिःश्रेयसीराजन्
विगुणेष्वपिबंधुषु तुषैरपिपरिभ्रंष्टानप्ररोहंतितंडुलाः ६६ मृदोःपरिभवोनित्यंवैरंतीक्ष्णस्यनित्य
शः उछृज्यतत्स्वयंतस्मान्मध्यांवृत्तिंसमाश्रयेत् ६७ तेजस्विनिक्षमोपेतेनातिकर्कशमाचरेत्
अतिनिर्मथनादग्निःचंदनादपिजायते ६८ दंतुमेवोपसरतिमृगेंद्रःसकुचत्यपि बुद्धिमंतःसदं
तेचनिधायहृदिकिंचन ६९ स्नानंनाममनःप्रसादजननंदुःस्वप्नविध्वंसनंशौचस्यापनंम
लापहरणंसंवर्द्धनंतेजसः रूपोद्योतकरंगदप्रशमनंकामस्यचाप्यायनंनारीणांचमनोहरंश्र
महरंस्नानंदशैतेगुणाः ७० तांबूलंमुखरोगनाशनिपुणंसंवर्द्धनंतेजसांनित्यंजाठरवह्निवृद्धि
जननंदुर्गंधिदोषापहं वक्त्रालंकरणंप्रकर्षजननंविद्वन्नृपाग्रेरणेकामस्यापतनंसमुद्भवकरंल
क्ष्म्याःसुखस्यास्पदं ७१ देवतातिथिविप्राणांपूजनंपापनाशनं लोकद्वयेपिशुभकृद्दानंधर्मय
शस्करं ७२ दिवानिरीक्ष्य[illegible]कव्यंरात्रौनैवचनैवच संचरंतिमहाधूर्त्तोवटेवरुरुचिर्यथा ७३

रा

१२

अतिदानवलिर्वद्धोनष्टोमानात्सुयोधनः विनष्टोरावणोलौल्यादतिसर्वत्रवर्जयेत् ७४ चिं
तनीयाहिविपदामादावेवप्रतिक्रियाः नकूपखननंयुक्तंप्रदीप्तेवह्निनागृहे ७५ मित्रस्वजन
वंधुनांबुद्धेर्धैर्यस्यचात्मनः आपन्निकषयात्मानानरोजानातिसारतं ७६ वृथावृष्टिसमुद्रे
षुवृथातृप्तस्यभोजनं वृथादानंसमर्थेषुवृथाश्रूरेविभूषणं ७७ सर्वथास्वहितमाचरणीयंकिं
करिष्यतिजनोबहुजल्पः नविद्यतेनखलुकश्चिदुपायःसर्वलोकपरितोषकरोयः ७८ विस्म
यःसर्वथाहेयःप्रत्यूहःसर्वकर्मणां तस्माद्विस्मयमुत्सृज्यसाध्यसिद्धिर्विधीयते ७९ यःकाकिनी
मप्यपथप्रपन्नामन्विष्यतेनिष्कसहस्रतुल्यं कालेचकोटिष्वपिमुक्तहस्तस्तंराजसिंहंनजहातिलक्ष्मीः
८० कृतोविवाहेव्यसनेरिपुक्षयेयशस्करेकर्मनितसंग्रहे प्रियासुनारीष्वधनेषुवंधुषुह्यतिव्ययोना
स्तिनराधिपानां ८१ आहवेव्यसनेचैवदुर्भिक्षेशत्रुविग्रहे राजद्वारेश्मशानेचयस्तिष्टतिसबांधवः ८२
त्यजेत्स्वामिनमत्युग्रंअत्युग्रात्कृपणंत्यजेत् कृपणादविशेषज्ञंतस्माच्चकृतिनाशकं ८३ स्थितंनरव्या

प्र.र.
१३

दाम्पत्यसंजल्पेगतंनशोच्चाभिकूतंनमन्ये द्वयोस्तृतीयोनभवाभिराजनकेनापिमूर्खोवदकारणेन
८४ विदग्धस्यचभुक्तस्यदंतस्यचलितस्यच अमात्यस्यचरुष्टमूलादुद्धरणंसुखं ८५ स्थान
भ्रष्टानशोभंतेदंताकेशानखानरा इतिविज्ञायमतिमान्स्वस्थानंनपरित्यजेत् ८६ मंत्रंबीजमिवा
पक्वंरक्षणीयंयथातथा मनागपिनभिद्यैतेतद्भिन्नंनप्ररोहति ८७ यत्रात्मीयोजनोनास्तिभेदस्त
त्रनविद्यते कुठारेर्दंडनिर्मुक्तैःभिद्यंतेतरवःकथं ८८ षट्कर्णोभिद्यतेमंत्रःचतुःकर्णस्थिरोभ
वेत् द्विकर्णस्यतुमंत्रस्यब्रह्माप्यंतंनगछति ८९ जयोरेवशमंशास्त्रंजयोरेवशमंबलं तयोर्विवा
दःसख्यंचनतुतुष्टविपुष्टयो ९० मंत्रिणावालिशैःसार्द्धंस्त्रीणांचयुवभिःसभा पुराकृतिरसाधूनां
मंत्रेराज्ञाविपत्तयः ९१ मंत्रिणांचमहीपालचित्तंविघटितंक्वचित् वलयंस्फटिकस्येवकोहिसंधा
तुमीश्वरः ९२ सद्भावेन[illegible]त्रंसद्भावेनचवांधवान् स्त्रीभृत्यान्दानमानाभ्यांदाक्षिण्येनतरंजे
नं ९३ परोक्षेकार्यहन्तार[illegible]त्यक्षेप्रियवादिनं वर्जयेत्तादृशंमित्रंविषकुंभंपयोमुखं ९४ एतद

रा
१३

र्थंकुलीनानांनृपाःकुर्वंतिसंग्र [illegible]हः आदिमध्यावसानेषुनतेयास्यंतिविक्रियां ९५ सर्वैरेकजनःशूरः
अनासादितसंगरः अदृ[illegible]सामर्थ्यःसदर्पःकोभवेन्नहि ९६ उत्तुंगशैलशिखरस्थितपादपस्यका
कःकृशोपिफलमालभतेसप[illegible]ः सिंहोबलीगजविदारणदारुणोपिसीदत्यहोतरुतलेखलुपक्षही
नः ९७ आपदार्थेधनंरक्षेदारानरक्षेधनैरपि आत्मानंसततंरक्षेदारैरपिधनैरपि ९८ क्वचिद्भूमौ
शय्याक्वचिदपिपर्यंकेशयनःक्वचिच्छाकाहारीक्वचिदपिचशाल्योदनरुचिः क्वचित्कंथाधारीक्व
चिदपिचदिव्यांबरधरोमनस्वीकार्यार्थीगणयतिदुःखंनचसुखं ९९ अपूज्यायत्रपूज्यंतेपूज्य
पूजाव्यतिक्रमः त्रीणितत्रप्रवर्तंतेदुर्भिक्षंमरणंभयं १०० यदस्थैर्यमवतामायुर्यदनीतिमतांश्रि
यः तदेतत्काकतालीयंतदेतच्चघुणाक्षरं १ तुल्येपराधेस्वर्भानुर्भानुमंतंचिरेणयत् हिमांशुमा
शुग्रसतेतन्नदिम्नःयस्फुटंफलं २ अनुकूलेविधौदेयंयतःपूरयिताहरिः प्रतिकूलेविधौदेयंयतः
सर्वंहरिष्यति ३ गुणेगौरवमायातिनमहत्यापिसंपदा पूर्णेंदुर्नतथावंद्योनिःकलंकोयथाकृशः॥

४ यानमक्षास्तथानार्योमृगयागीतवादिते एतानियुक्त्यासेवेतप्रसंगोह्यत्रदोषवान् ५ दुस्थोरपि
निजैरेवप्रावृतंसर्वमुत्तमं वरंजीर्णंवरेणापिहृद्देकपटमर्थीति ६ वस्त्रंगान्वबकुक्षीराजेलपात्रमुपा
नहो औषधंबीर्यमाहार्यसंकीर्णेनयथाप्नुयात् ७ घटंभिंद्यात्पटंछिंद्यात्कुर्यात्किंचिद्यथाद्भु
तं येनकेनाप्युपायेननोविज्ञातःपुरेवसेत् ८ अलुब्धोपिधनंराज्ञःसंश्रितोयातिसंपदं महा
हृदसमीपस्थंपश्यनीलंवनस्पतिं ९ कठिनंवामधुरंवाप्रस्तुतवचनंमनाहारी वामेगर्दभनादं
हिंचिन्नप्रीत्यैप्रयत्नेषु १० किमप्यसाध्यंमहतांसिद्धिमेतिलघीयसी प्रदीपोदहतिगेहांतर्ध्वांतंहं
तिनभानुमान् ११ कोहंकोदेशकालौसमविषमगुणाःकेरयःकेसहायाः काशक्तिःकोभ्युपायः
फलमिहवक्ताकिंकीदृशीदै[illegible]संपत् १२ संपन्नोकोपिबंधुःप्रतिहतवचनःस्योत्तरंकिंनुमेस्यादित्ये
वंकार्यसिद्धावदितमनसो[illegible]स्याभवंतिः १३ प्रणामत्युन्नतिहेतोर्जीवनहेतोर्विमुंचतिप्राणान् ॥
दुःखीयतिसुखहेतोः कोमूढ[illegible]सेवकादन्यः १४ कथंनामनसेव्यंतेयत्नतःपरमेश्वराः अचिरेणे

वयेतुष्टाःपूरयंतिमनोरथान १५ तुष्टोपिराजायद्दद्यानतत्तुष्टोवणिग्जनः अतोभूमिपतिःसे
व्यस्त्याज्योदूरतरेनसः [illegible] तःसेवाविहीनस्यचामरोद्धूतसंपदः उद्दंडधवलछत्रवाजिवारण
वादिनी १७ रागेद्वेषेचम [illegible] द्रोहेपापेचकर्मणि अप्रियेचैवकर्त्तव्येचिरकारीप्रशस्यते १८
नापरीक्ष्यनयेद्दंडनंचमंत्रंप्रकाशयेत् विसृजेनचलुब्धेभ्योविश्वसेनापकारिषु १९ चिरेणमित्रं
संधीयाच्चिरेणचकृतंत्यजेत् चिरेणमित्रंसंधीयाच्चिरंधारणमर्हति २० बंधूनांसुहृदांचैवभृत्या
नांस्त्रीजनस्यच अव्यक्तेष्वपराधेषुचिरकारीप्रशस्यते २१ चरेद्धर्मानकटुकोगुंजनस्नेहन
नास्तिकः अनृशंसंचरेदर्थंचरेत्कामममनुद्धतः २२ संदधीतनचानार्यैर्विगृह्णीयान्नबंधुभिः
नाभक्तंचारयेच्चारं कुर्यात्कार्यमपीडया २३ नविश्वसेत्कुमित्रस्यकायस्थस्यनविश्वसेत् वि
श्वासाद्भयमुत्पन्नंमूलादपिनिकृंतति २४ सारासारपरिक्षेतास्वामीभृत्यस्यदुर्लभः अनुकूलःशु
चिर्दक्षःप्रभोर्भृत्योपिदुर्लभः २५ राजातुष्टोपिभृत्यानांमानमात्रंप्रयच्छति तेपिसंमानमात्रेण

पथ्यपकुर्वं॥
प्राणैः कंठगतैरपि २६ निर्विशेषं यदा राजा समं भृत्येषु तिष्ठति तदोद्यमसमर्थानां उत्साहः परिहीय
ते २७ सुमंत्रिते सुविक्रांते सुकृते सुविचारिते प्रारंभे कृतबुद्धीनां सिद्धिरव्यभिचारिणी २७ सर्वे
यत्र विनेतारः सर्वे पंडितमानिनः सर्वे महत्त्वमिच्छंति तद्वृंदमवसीदति २८ सेवया धनमिच्छद्भिः
सेवकैः पश्य यत्कृतं स्वातंत्र्यं यच्छरीरस्य मूढैस्तदपि हारितं ३० वरं वनं वरं भैक्ष्यं वरं भारोपजीवनं
पुंसां विवेकयुक्तानां न सेवया धनार्जनं ३१ अथ संग्रामविधिः प्रथमं क्रियते स्नानं शुष्कवस्त्रावृ
तो भवेत् मांगल्यरूपसंयुक्तो देवविप्रांश्च पूजयेत् १ क्षेत्रपालस्य नाम्ना च बलिं दद्यात् दिशो दश ॥
शस्त्राणि चापि संपूज्य रक्षामंत्रं स्मरेत्ततः २ मंत्रः ॐ शूलेन पाहि नो देवी पाहि खड्गेन चांबिके ॥
घंटास्वनेन नः पाहि चाप[illegible]स्वनेन च ३ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे भ्रामणेना
लशूलस्य उत्तरस्यां तथे[illegible] ४ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते यानि चात्यंत घोरा
णि तै रक्षास्मांस्तथा भुवं ५ खड्गशूलगदादीनि यानि चास्त्राणि तेंऽबिके करपल्लवसंगीनि तैरस्मान्

रक्षसर्वतः ६ इतिरक्षामंत्र दिव्यौषधीनांलेपंचरक्षार्थंधंचकारयेत् किंचिद्भुक्त्वाचपीत्वाचततःसं
न्नाहमुद्वहेत् ७ सेना[illegible]नारोहानांप्रांश्चसुभटांस्तथा मुख्यानन्यानपिधनैर्वस्त्रैश्चपरितोषये
त् ८ खड्गंचर्मगदांशा[illegible]पंमुद्गरंतथा नाराचंपरशुंकुंतंपट्टिशादींश्चधारयेत् ९ लाभस्तेषां
जयस्तेषांकुतस्तेषांपराजयः येषांहृदिस्थोभगवान्मंगलायतनोहरि १० ततोर्ज्जुननामानिवि
ष्णुस्मरणपूर्वकं जपेत्ततःप्रतिष्ठेतचतुरंगबलैर्युतः नामानि अर्जुनःफाल्गुनोजिष्णुकिरीटीश्वे
तवाहनः बीभत्सुर्विजयीकृष्णःसव्यसाचीधनंजयः १२ इतिसंग्रामविधिः अथाक्षौहिणीसंख्या
एकेभैकरथाश्वापतिःपंचपदातिका पत्यंगैस्त्रिगुणैःसर्वैःक्रमादाख्यायथोत्तरं १३ अथसे
नामुखगुल्मवाहिणीपृतनाचमूः अनीकिनीदशानीकीन्यक्षौहिणामतः १४ पतिप्रमाणं १हा
थी १ रथ ३ घोरे ५ पैदात्रिगुणापतिः सेनामुखं ३ हाथी ३ रथ ९ घोरे १५ पैदात्रिगुणासेनामुखंगुल्मः ९
हा ९ रथ २७ घोरे ४५ पैदात्रिगुणोगुल्मोगणः २७ हाथी २७ रथ ८१ घोरे १३५ पैदात्रिगुणोगणोवाहिनी

प्र.र.
१६

८१ हाथी ८१ रथ २४३ घोरे ४०५ पैदा त्रिगुणो वाहिनी पृतना २४३ हाथी २४३ रथ ७२९ घोरे
१२१५ पैदा त्रिगुणा पृतना चमूः ७२९ हाथी ७९ घोरे ३६४५ पैदा त्रिगुणा चमूरणीकिनी २१
८७ हाथी २१८७ रथ ६५६१ घोरे १०८३५ पैदा त्रिगुणानीकिनी अक्षौहिणी २१८७० सर्वे
तन्मध्ये २१८७० हाथी २१८७० रथ ६५६१० घोरे १०८३५० पैदा इत्यमरः अन्येच्च खद्वि
यं स्वरवस्विंडुनेत्रै रक्षौहिणीमता अक्षौहिण्यां प्रतिष्ठा च रथानां च मे धारिणां संख्यागणित
तत्वज्ञैः सहस्राण्येकविंशतिः उपर्यष्टौ शतान्याहुस्तथाभूयश्च सप्ततिः गजानां तु परीमाणमेत
द्देवविनिर्दिशेत् ज्ञेयं लक्षं पदातीनां सहस्राणि तथा नव शतानि त्रीणि पंचाशन्नूराणां शस्त्रधा
रिणां पंचषष्टिसहस्रा[illegible]तथाश्वानां शतानि षट् दशोत्तराणि च प्राहुः संख्यातत्वविदो जनः इति
अक्षौहिणीसंख्या [illegible] महानक्षौहिणी खद्वयं निधिवेदाक्षिचंद्रषग्निहिमांशुभिः महाक्षौहि
निका प्रोक्ता संख्यागणि[illegible]वेदैः १३०१२४८७०० कोट्यस्त्रयोदश प्रोक्ता लक्षाणामेकसप्ततिः
चतुर्विंशत्सहस्राणि तथा न[illegible]शतानि च महाक्षौहनिका प्राहुरिमां तत्वविदो जनः महाक्षौहनिका

राम
१६

यांतुरथाकोटिमतः स्मृतः [illegible] त्रिंशञ्चलक्षाणिगीयंतेतत्ववादिभिः द्वादशैवसहस्राणिचत्वार्थेवशता
निच प्रोक्तानिनवतिर[illegible] भवगजामताः षट्कोट्यशीतिलक्षाणिरुद्रसंख्यामितानिच सप्तत्रिंश
त्सहस्राणितथाशतंचतु[illegible] अश्वानांसप्ततिःसंख्यागणितापूर्वसूरिभिः १३७१२४८० रथ१३
७१२४८० गज४११३७४३४ घोरे ६८५६२४५० पैदा इतिमहाक्षौहिणीसंख्या अथव्यूहविधिः
मुखेरथागजाःपृष्ठेतत्पृष्ठेतुपदातयः पार्श्वयोश्चहयाःकार्याःव्यूहस्यायंविधिस्मृतः २२ अर्द्धचं
द्रंचचक्रंचशकटंमकरंतथा कमलश्रेणिकागुल्मव्यूहान्येवंप्रकल्पयेत् २३ इतिव्यूहविधिः अ
थयुद्धविधिः योराजपुत्राःसमिताःआत्मसेवकजातयः तान्सर्वानात्मनःपार्श्वेरक्षार्थेस्थापयेन्नृपः
२४ यस्मिन्कुलेयःपुरुषःप्रधानःससर्वयत्नेनहिरक्षणीयः तस्मिन्विनष्टेकिलसारभूतेनानाभिभंगं
चपरंवहंति २५ परस्परानुरक्तायेयोधाःशार्ङ्गधनुर्धराः धनुस्त्करगरूढास्तेजयंतिचरणेरिपून् २६
एकःकापुरुषोदीर्णोदारयेन्महतींचमून् नदीतमनुदीर्यंतेयोधाःशूरतमाअपि २७ दुर्निवारतया
चैवअभग्नामहतींचमूः अपामिवमहावेगाःत्रस्तामृगगणाइव २८ मूर्छितंनैवविकलंनाशस्त्रं

प्र॰ र॰
२

चान्ययोधितं पलायमान[illegible]रणागतं चैव न हिंसयेत् २९ भीरुः पलायमानोपि नान्वेष्टव्यो बली
यसा अल्पायां वा महत्यां वा सेनायामिह निश्चयः ३० हर्षो योधगणस्यैको जयलक्षणमुच्यते
अन्वे यं वायवो वांति पृष्ठे भानुर्वयांसि च ३१ अनुप्लवंते मेघाश्च यस्य तस्य रणे जयः अपूर्णे ने
वमर्त्तव्यं संपूर्णे नैव जीवितं ३२ सदा सुप्ता भवंत्येते नो वाजिनस्ते तु भूतले आयस्यायोधने शा ते के
केरस्य च भक्षणे ३३ यासंख्या रोमकूपाणां वाहकस्य हयस्य च तावद्वर्षं वसेत्स्वर्गे हयपृष्ठे हतेन रः
३४ जिते लक्ष्मीर्मृते स्वर्गः कीर्त्तिश्च धरणीतले तस्माद्धैर्यं विधातव्यं हत्वा परवाहिनी ३५ यस्तु भ
ग्नेषु सैन्येषु विद्रुतेषु निवर्त्तते पदे पदेश्वमेधस्य लभते फलमक्षयं ३६ यत्र यत्र हतः शूरः शत्रुभिः परि
वेष्टितं अक्षयं लभते लोकं यदि क्लीवं न भाषते ३७ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ परिव्रा[illegible]
योगयुक्तश्च रणे चाभिमुखे[illegible]तः ३८ मृतप्राप्स्यामि वा स्वर्गं शत्रुं हत्वा सुखानि च उभावपि हि शूराणां गुणा
वेतौ सुदुर्लभौ ३९ सए[illegible]खलु संपरेतो वर्त्तेत यो स्यंतनं संसितेन देहमृतेन मनुजा शयं तिगं तात
मोधं तनुमानिनो ध्रुवं ४०[illegible]समरमपास्य नास्ति मृत्योर्भयमति सुक्रमितोन्यतः प्रयातुं अथमर

रा॰
१७

णामवस्थमेकजंतोः किमितिनि[illegible]स्तिनं यशः ४१ इतिश्रीकरणकुलालंकारपुरुषोत्तमसूनुहरि
दासविरचिते प्रस्तावरत्ना[illegible]तिसमाप्तः अथप्रकीर्णकाख्यानं शशिदिवसधूसरोगलितयौ
वनाकामिनीसरोविगतवारि[illegible]खमनक्षरंस्वाकृतेः प्रभुर्धनपरायणः सततदुर्गतः सज्जनोनृपांगणगतः
खलोमनसिसप्तशल्यानिमे १ वासःशुभ्रमृतुर्वसंतसमयः पुष्पंसरन्मालती धानुष्कः कुसुमायुधः परि
मलः कस्तूरिकास्त्रंधनुः वाणीतर्करसोज्वला युवतिपुस्यामावपुर्नूतनं मार्गोवैष्णवएवपंचयागी
तिष्कविविलक्षणः २ उत्तमाआत्मनःख्याताः पितुःख्याताश्चमध्यमाः अधमामातुलःख्याताः श्वशु
राच्चाधमाधमाः ३ श्रोत्रंश्रुतेनैवनकुंडलेन दानेनपाणिर्नतुकंकणेन आभातिकायःकरुणाःपराणां
परोपकारेणनचचंदनेन ४ कोकिलास्वरोरूपं नारीरूपं पतिव्रता विद्यारूपंकुरूपाणां क्षमारूपंत
पस्विना ५ अप्राप्तिवोधेश्रीहरि-चक्रवीक्ष्यप्रयातिवैफल्यं नयनविहीनेभर्तरिलावण्यमिवरंजनाक्षीणां
६ शैलेशैलेनमाणिक्यंमौक्तिकंनगजेगजे साधवोनहिसर्वत्रचंदनंनवनेवने ७ धनाशाजीविताशाचगु
र्विप्राणभृतांसदा वृद्धस्ययुवतीभार्याप्राणेभ्योपिगरीयसी ८ एकोदेवःकेशवोवाशिवोवा एकःमित्रंभूप

प्र.र.
१८

तिर्वा यतिर्वा एका भार्या सुंदरी वा दरी वा एको वासः पट्टने वा वने वा ९ भोज्यंभोज्यनशक्तिश्चरतिश
क्तिर्वरास्त्रियः विभवेदानशक्तिश्च नाल्पस्यतपसः फलं १० चित्रांतेनगतावर्षाप्रस्तुतागतयौवना प्र
वासीन्चगतःसौख्याद्याच्चयागतगौरवः ११ अज्ञानकर्मकर्तृत्वमसिधाराविलेहनं पंचाननपरिष्वंग
व्यालीवदनचुंबनं १२ गुणेषुराज्यंतियेषांस्वीयेष्वप्यवनिर्लेपस्व पश्यंतिसामास्तनशातकंभगिरीरां
नरनिर्विशेषं १३ स्वदेशजातोपिगुणाधिततोपिलोकस्यभवेदवज्ञा निजांगनायद्यपिरूपराशिस्तथा
पिपुंसांपरदारदृष्टिः १४ शाखामृगस्यशाखायाःशाखांगंतुंपराक्रमः उल्लंघितोयदंभोभिःप्रभावःप्रभ
वोर्हिसः १५ नास्तिचौरेसदासस्यंनशौचंवृषलीपते मद्यपेसौहृदंनास्तिद्यूतेषुविनयंनहि १६ यशः
पुण्यंकलत्राणिपुत्रोत्पत्तिर्निधीस्तथा सुकृतादपिलभ्यंतेनचपार्थपराक्रमात् १७ चांचल्यमुच्चैश्रव
सःकलायाश्कोटिल्यमिंदो[illegible]नोर्विमोहः इतिश्रियासिक्ष्यसहोदरेभ्यःकुतोनुजानेगुणिनांविरोधाः १८
अन्यमुखडवीदःप्रियजं[illegible]एवपरिहासः इतरेंधनयोधूमःसएवागुरुसंभवोधूपः १९ वरंदारिद्र
मन्यायप्रभवाद्विभवादिह [illegible]भिमतादेहपीनतानतुशोफतः २० धर्मदान्यर्जितेवित्तेऽनुभवंतिसुखं

र
१८

परे स्वयंपापस्यपात्रंस्यातकिं[illegible]जवधादिह २१ यथाकाष्ठमयोहस्तीयथाचर्ममयोमृगः तथावेदं
विनाविप्रःत्रयस्तेनामधा[illegible]२ मातेवरक्षतिपितेवहितेनयुक्तेकांतेवचाभिरमयस्यपनीयदोषं लक्ष्मीं
तनोतिवितनोतिचदिक्षुकी[illegible]किंनसाधयतिकल्पतेरूवविद्ये २३ हर्तुर्यातुनगोचरंकिमपिशंपुष्ण
तियत्सर्वदाप्यर्थिभ्यःप्रतिपाद्यमानमनिशंप्राप्नोतिवृद्धिंपरं कल्पांतेष्वपिनप्रयातिनिधनंविद्याख्यमं
तर्धनंयेषांतान्प्रतिमानमुत्नृपाःकस्तैसंहस्पर्द्धते २४ सर्वद्रव्येषुविद्यैवद्रव्यमाहुरनुत्तमं अ
हार्यत्वादनर्घत्वादक्षय्यत्वाच्चसर्वदा २५ विद्यानामनरस्यरूपमधिकंप्रछन्नगुप्तंधनंविद्याभोगक
रीयशःसुखकरीविद्यागुरूणांगुरुः विद्याबंधुजनोविदेशगमनेविद्यापरंदैवतंविद्याराजसुपूजिता
नतुधनैर्विद्याविहीनःपशुः २६ आयाशातस्यलब्धस्यप्राणेभ्योपिगरीयसः गतिरेकैववित्तस्यदा
नमन्याविपत्तयः २७ दानंभोगोनाशःतिस्रोगतयोभवंतिवित्तस्य योनददातिनभुंक्तेतस्यतृतीया
गतिर्भवति २८ वरंकृतध्वस्तगुणादत्यंतमगुणःपुमान् प्रकृत्याह्यमणिःश्रेयान्नालंकारच्युतोप

पल्लीः २९ वरंसखेसत्पुरुषापमानंननीचसंसर्गगुणोरलंकृतः वरोश्वपादेनहतोविराजतेनरासभस्यो
परिसंस्थितोनरः ३० अनवसरेगुणवानपिहृदयादवतार्यतेहारा पथ्यशलाकोवसरेतृणमपिभूपैप्रसार्य
तेस्वकरः ३१ व्याधेनत्वपरिज्ञानंवेदनायाश्चनिग्रहाः एतद्वैद्यस्यवैद्यत्वंनवैद्यःप्रभुरायुषः ३२ पुण्य
तीर्थेकृतेयेनतपःक्वाप्यतिदुष्करं तस्यपुत्रोभवेद्वश्याःसमृद्धोधार्मिकःसुधीः ३३ किंकवेस्तस्यकाव्येन
किंकांडेनधनुष्मतः परस्यहृदयेलग्नंनघूर्णयतियच्छिरः ३४ दातव्यमितियद्दानंदीयतेनुपकारिणे
कालेदेशेचपात्रेचतद्दानंसात्विकंविदुः ३५ दरिद्रान्भरकौंतेयमाप्रयच्छेश्वरेधनं व्याधितस्यौषधंप
थ्यंनीरुजस्यकिमौषधं ३६ दूरस्थोपिसमीपस्थोयोयस्यहृदिवर्त्तते योयस्यहृदयेनास्तिसमीपस्थोपिदू
रतः ३७ मद्यपाःकिंनवल्गंतिकिंनभक्षंतिवायसा कवयःकिंनकुर्वंतिकिंनकुर्वंतियोषितः ३८ नपुत्रं
तेनपुज्यंतेगुणोरासाद्यतेप[illegible]व्यापारमादत्तेप्रदीपोनपुनःशनिः ३९ अंगानिचतुरोवेदाःपुराणंन्याय
विस्तरः मीमांशाधर्मशा[illegible]ाएताश्चतुर्दशः ४० गतश्रीगणकान्द्वेष्टिगतायुश्चचिकित्सकान् गतश्री
श्चगतायुश्चब्राह्मणान्द्वेष्टिमा[illegible]ा ४१ युगेयुगेषुयेधर्मायेषुधर्मेषुयेद्विजाः तेषांनिंदानकर्त्तव्यायुगरूपा

हिवैहिजाः ४२ आक्रम्य [illegible] भुक्तंपरेस्त्रीणेश्चबांधवैः गोभिश्चनृपशार्दूलराजसूयाहिशिष्यते ४३ प्र
जस्यधोधोयासुखैन्नरः [illegible] ईतैः खनितेवहिकूपस्यमासादःस्वेवकारकः ४४ यत्रास्तिलक्ष्मीर्विनयो
गतत्र अभ्यागतोस्युत्रनत [illegible] क्ष्मी उभौवतोयत्रनेतत्रविद्यानेकत्रसर्वत्रगुणात्रपंचे ४५ तथारिभिर्न्नव्य
थितःशिलीमुखैर्वेशोतेदिगंतोहृदयेनदूयता स्वानांतथावक्रधियांदुरुक्तिभिर्दिवानिशंतप्यतिमर्मताडि
भिः ४६ अशक्तःसर्वतःसाधूःकुरूपा च पतिव्रता व्याधितोदेवभक्तश्चनिर्धनाब्रह्मचारिणः ४७
बोधयंतिनयाचंतोभिक्षाचारागृहेगृहे दीयतांदीयतांनित्यमदातुःफलमीदृशं ४८ हस्तादपिन
दातव्यंगृहादपिनदीयते परोपकरणार्थायवचनेपिदरिद्रतां ४९ तावन्मृदुत्वंपांडित्यंकुलीनत्वं
विवेकतः यावज्ज्वलतिनांगेषुहतःपंचेषुपावकः ५० योलाभात्त्यापरद्रोहात्त्यापात्रेनपरार्थतः
प्रीतिलक्ष्मीव्ययक्लेशःसाकिंसाकिंसकिंसकिं ५१ रामरामतवनामजपंतःपामराअपितरंतिभवाब्धिं
अंगसंगभवदंगुलिमुद्रः किंनुचित्रमतरत्कपिरब्धिं ५२ चांद्रेलांछनताहिमंहिमगिरोक्षारंजलंसा

प्र.र. गरेवद्धश्चंदनपादपोविषधरैरंभोरुहेकंटकैः स्त्रीरत्नेषुजराकुचेषुपतनंविद्वत्सुदारिद्रता सर्वंरत्नमुप
द्रवेनसहितंनिर्दोषमेकंयशः ५३ किंमिष्टंसुतवचनंमिष्टतरंतदेवसुतवचनं मिष्टान्नमिष्टतमंकिंश्रुत
२० परिपक्वंतदेवसुतवचनं ५४ अघ्रातंमरणेनजन्मजरयाविद्युच्चलंयौवनंसंतोषोधनलिप्सयाशमसु
खंप्रौढांगणाविभ्रमैः लोकैर्मत्सरिभिर्गुणास्तकतरवोव्यालैर्नृपोदुर्जनैर्नैस्वेनधृतिभिर्महीचदूषताग्र
स्तंनकिंकेनवा ५५ संतप्तायसिसंस्थितस्यपयसोनामापिनज्ञायतेमुक्ताकारतयातदेवनलिनीपत्रस्थि
तंराजते स्वात्यांसागरशुक्तिमध्यपतितंतज्जायतेमौक्तिकंप्रायेणाधममध्यमोत्तमगुणाःसंसर्गतोजाय
ते ५६ अदृष्टेदर्शनोत्कंठादृष्टेविश्लेषभीरुता नादृष्टेनचदृष्टेनभवताविद्यतेसुखं ५७ गुणवज्जनसंप राम
र्कात्यातिसर्वोपिगौरवं पु[illegible]मालानुसंगेनसूत्रंशिरसिधार्यते ५८ दुराशेवदरिद्रस्यतृष्णेवकृपणस्यच २०
अहोनविरमत्येषांहृत[illegible]ामिनी ५९ धनंयदिनमेदत्सेविधेमारेहिकिंचित् औदार्यंधनिनोरे
हियन्नदीयेहृदिस्थित[illegible]सौख्यसौभाग्यकरागुणान्नृणांस्वयंगृहीतासुदृशांस्तनाइव परैर्गृहीता

हिसुखंवितन्वतेततोनगृह्नं [illegible] जंगुणंबुधाः ६१ कृपणोनसमोदातानभूतोनभविष्यति स्पृशंमेवनवित्तानि
यःपरेभ्यःप्रयछति ६२ [illegible] नमालोक्यनिजबंधनशंकया राजन्लक्ष्मीकुरंगीवदूरंदूरंपलायते ६३
द्वाविमौपुरुषौलोकेनभूतो [illegible] विष्यते प्रार्थितोनविकुरुतेयश्चनार्थयतेपरं ६४ द्वाविमौपुरुषौलोकेस्वर्ग
स्योपरितिष्ठतः प्रभुश्चक्षमयायुक्तोदरिद्रश्चप्रदानवान्. ६५ अदातापुरुषस्त्यागीधनंसंत्यज्यगछति
दातारंकृपणंमन्येमृतोप्यर्थंनमुंचति ६६ गतःसकालोयत्रासीदवह्नाकल्पशाखिनां उंबरफलेभ्योपि
स्पृहमौपोधुनावय ६७ पदास्थितस्यपद्मस्यमित्रेवरुणभास्करौ पदच्युतस्यपद्मस्यक्लेशदाहकरावु
भौ ६८ विकृतिंनैवगछंतिसंगदोषेणसाधवः आवेष्टितंमहासर्पैश्चंदनंनविषायते ६९ रहतोपुष्यमा
नस्यपठतःपुलकोनचेत् आत्मनश्चपरेषांचधिक्त्यागंपौरुषंचधिक् ७० इतिश्रीकरणाकु० पु० ह०
प्रस्तावरत्ना० प्रकीर्णकारव्यानपरिछेदः अथान्यापदेशाः उच्चैरेषतरुःफलंचविपुलंदृष्ट्वैवहृ
ष्टाःसुकाःपक्वंशालिवनंविहायजडधीस्तंनारिकेरंगतः तत्रारुह्यविबुसितेनमनसायत्नंकृतोभेदनेप्याशा
तस्यनकेवलंविगलिताचंचुर्गताचूर्णतां १ हंसःपद्मवनाशयामधुलिहःसौरभ्यलोभाशयाकीराप

४१

प्र.र.
२१

कफलाशया वालेभुजंगरधश्वमांसाशया दूराद्दर्शितकायकांडनितरांनिःसारमिथ्योन्नतेरेरेशाल्मलि
पादपप्रतिदिनंकेनत्वयावंचिता २ किंशुकेशुकमातिष्टभाविस्वादुफलाशया बाह्यरंगप्रपंचेनकेके
नानेनवंचिता ३ यद्यपिसंतिबहूनिसरांसिस्वादुशीतलसुरभिपयांसि चातकपोतस्तदपिचतानि
त्यक्त्वायाचतिजलदजलानि ४ नष्टेवारिजविपिनेकाष्टेनष्टेचमालतीनिकरे नत्किंजीवतिमूल
मकरंदबिंदुनाद्दलिः ५ पानार्थिनोमधुकरायदिकरात्प्रदिक्कर्णयानेनदूरीकृताःकरिवरेणमदांधबु
ध्या तस्यैवगंडयुगमंडनहानिरेषाःभृंगाःपुनर्विकचपद्मवनेचरंति ६ यस्तोषंनगतःकमलेषुमल्लीचं
पकबकुलकुलेषु तस्यालेर्यदिनिंबवासःकथयकथंनभवत्युपहासः ७ क्षारंवारिनचिंतितंनगणिताः
क्रूराःश्वनक्रादयःपश्चद्वीपिकदंबडंबरमिलत्त्रासोपिदूरीकृतः मध्येंभोनिधिमत्स्परंकमभवत्ताक्षंपःकृतो
लीलयासंपातिःसफराज[illegible]रिहप्राणप्रयाणावधिः ८ इंद्रोयमोसिवरुणोसिकुताशनोसिब्रह्माह
रोहरिरसीत्वमसकृद्धडु[illegible]लिमौलिमणिरंजितपादपीठतस्मान्नतस्यफलमिंधनमुद्वहामि ९
मर्यादानिलयीमहोदधिर[illegible]काकरोनिश्चितःप्रार्थिताप्तपरिपूरकोनुगमितःसंपत्तिहेतुर्मया शंबूकोपिन

२

42

लभ्यते किमपरं रत्नं महार्घं पयं[illegible]यो यन्न महोदधेः फलमिदं जन्मांतरीयं मम १० केतक्याः कटुकंटकैः कुमु
दिनी दोषोदयान्मोदते[illegible]लाः वलिपुनः पंकेरुहां पंक्तयः अन्यानि प्रसवानि षट्पद न्यासे रवोक्त
चिद्भृंगो भ्राम्यति कल्पवृक्ष[illegible]नं ते भवंतं विना ११ सारंगो भजनेन तैव भजते भावं परं भो विभो ह्यन्यलि
नू वचनं नियम्य कुरुते याच्ञां न ते याचकः पारावारे सरित्सु पूरजलदग्रामे स्वकीयोदये स्वं नाशं परि
पूरकः कथय कं याचेत नाहाम्बुधः १२ तांबूलेन विना राजन् जडीभूता सरस्वती निःसरंति मुखाद्वाणी
गृहात्कुलवधूरिव १३ हे कोकिल कुरु मौनं जलधरसमये पिपिच्छिला पृथिवी विकसति कुटजकदं
बकरिभे के कुतस्तवावसरः १४ कल्पवृक्षोपि कालेन भवेद्यदि फलप्रदः को विशेषस्तदा तस्य अन्यैर्वन्यै
र्महीरुहैः १५ स्वस्त्यस्तु विद्रुमवनाय नमो मणिभ्यः कल्याणिनी भवतु मौक्तिकशुक्तिमाला प्राप्तं मया सक
लमेव फलं पयोधेर्यद्दारुणैर्जलचरैर्न विदारितोस्मि १६ कस्त्वं भोः कविरस्मि तत्किमु सखे क्षीणोस्यनाहारतो
धिग्देशं गुणिनोपि दुर्गतिरियं देशं न मामेव धिक् पाकार्थी क्षुधितो यदैव विदधे पाकाय बुद्धिं तदा विंध्ये नेंधनम
ब्धौ न सलिलं नान्नं धरित्रीतले १७ किं जातोसि चतुष्पथे घनतरं छन्नोसि किं छायया छन्नश्चेत्फलितोसि

प्र॰ २॰ किं फलभरैरास्योः किं सर्वतः हे सहृद्समहस्वसंप्रति हं खेशरवाशिरवाकर्षणं छेदाभंजनताडनानि जनि
तैः खेरैरबहुश्चेष्टितैः १८ अन्येते विहगाः पयोदपरितो धावंति तृष्णातुरा वापीकूपतडागसागरजलेमज्जंति
२२ हृष्टादराः मामद्यापिसमीक्ष्य चातकशिशुं यः शुष्ककंठोपि सन्नान्यावांछति नोपसर्पति नच प्रस्तौति नच ध्या
यति १९ यद्यपि कानो हानिः परकीयां चरति रासभे द्राक्षां असमंजसमिति मत्वा तथापि खलु पिधेत चेतः
२० एतस्मिन्मलयाचले वकुलविधे किं नैरकिंचित्करैः काकोलूककपोतकोकिलकुलैः केकोपि पार्श्वस्थितः के
कीकूजति चेतरां विघटिता व्यालावलीवंधनः सेव्यः स्यादिह सर्वलोकमनसामानंदनश्चंदनः २१ किं केकी
वा शिखंडिमंडिततनुः किं कीरवृत्पाठकः किं वा हंसइवांगनागतिगुरुः सारीवकीसुस्वरः किं वा हंत शकुंतपाल
पिकवत्कर्णामृतस्यंदनः काकः केनगुणेन कांचनमये व्यापारितः पंजरे २२ अत्रस्थः सखि लक्षयोजनगतु
स्यापि प्रियस्यागमं वेलार धिचंचुकारपरमेसर्वैपठंतस्थिताः मत्कांतस्य वियोगतापदहनज्वालावली २१
चंदनः काकस्तेनगुणेन ये व्यापारितः पंजरे २३ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः धन्या
महीरुहा येभ्यो निराशा यांति ना र्थिनः २४ शाखोटशाल्मलिपलाशकरीरकाद्याः शृण्वंतु पुस्तपनिलयोपदसो

वसंतः युष्मभ्यमर्प्ययति प [illegible] ाय लक्ष्मीसौरभ्यसंभवविधिस्त्वविधेरधीनः २५ विभागेत्वयि भस्मकः
सभवत्तन्मंदादरेष्वंदनैक [illegible] लयांचकार्णीकृतींवसानेत्वयि धत्तूरस्य हयाल्लुतोत्वपिगतेतस्याजकः के
तकीत्वंपुत्रयन्विर्ईयंश्चभग [illegible] रूढवाभोजनश्राजीहत्वमाश्वरगुणीश्लोकोस्तितद्वारुकः २६ धत्सेब्रह्मशिरो
यदिभ्रमयसिविमेतेपुसरव्यपरिक्षाबः क्रीडसिमातृभिर्यद्रिरतिंधत्सेस्मशानेयदि स्पृहामंहरसिप्रजायदितथाप्या
श्चायभंक्तोमनः कंसेवेकरवाणाकिंनुजगतीशून्या त्वमेवेश्वरः २७ पुक्तोसिभुवनभारेमोवक्रोविभुनतुकाधरांग
पः त्वय्येकस्मिन्दुरितनिस्तुरिवतानिभवंतिभुवनानि २८ यःपीयूषसहोदरैस्तापयतिजोत्स्नाजलैः सर्वतोयश्च
त्वामधिकंज्वलयतिप्रोद्दाममतापैःकरैः भ्रांतव्योमतयोरपिस्थितमिदंव्योतन्वतोविक्रियानिर्मुक्तस्समदृत्वमेतद
समंदूरेनिरूढंतव २९ मौलिनामगुणास्तवेवतदनुखाभाविकीस्वताकिंब्रूमःश्रुचितांभवंतिशुच्चयःस्पर्शेनयस्याप
रे किंपखैक्षिचितःपरमुच्यतेःश्रुतिपदंसंजीवनंदेहिनांत्वंचेन्नीचपथेनगच्छसिपयःकस्तानिपातुंक्षमः ३० स
मुद्रापत्यंतेप्रथितमहिमामुद्रितभुवःस्वसामालेयांश्योस्त्रिनयनशिरोधामवसते मुरारेर्योपिसंसृतरसिरुहकिंज
ल्केनिलया तथापिश्रीस्त्वीत्वात्मकृतिवपलालिंगाखिलान् ३१ यस्तूर्वंपनाग्निसाल्लसलिलेश्वोर्णतपोऽ

ष्करं तस्यैतत्फलमीदृशं परिणतं यज्जातरूपं वपुः मुग्धापांडुकपोलचंदनपटुः संगच्छरन्तस्तभेप्राप्तंकुं
प्र·२ डुलवांछसे किमपरं यन्मूढदोलायसे ३२ स्तुत्वाकुंभसमुद्भवेनमुनिनाकिंचिन्नदृस्याद्दिनंसिद्धांबंधकुं
२३ डुंबदर्दुरकुलं हर्षादिदं ध्यायति गांभीर्याद्यदि तेनविभ्यति नृगंत्रस्यति भेकीशिशोरन्नागस्यसुरवंवशंतु
तिमयोजातानुकंपावयः ३३ अस्तंगतोयमरविंदवनैकबंधुर्भास्वान्नलंघयतिकोपिविधिप्रणीतं॥
हेचक्र धैर्यमवलंब्य विमुंच शोकं धीरास्तरंति विपदं न तु दीनचित्ताः ३४ रात्रिर्गमिष्यति भविष्यति सुप्रभा
तंभास्वानुदेष्यति हसिष्यति पंकजश्रीः इत्यादिचिंतयति कोशकृति द्विरेफे हाहंत हंत नलिनीगजउज्ज
हार ३५ द्वात्रिंशद्दशनद्वयीमध्येभ्रमसिनिस्त्रशः तदिदंसिक्षिताकेनजिह्वेसंचरकौशलं ३६ अपिस
कोलिकस्तूरीपामरैः पंकशंकया अलंखेदेनभूपालाः किं न संति महीतले ३७ जन्मस्थानंनखलुविम
लंवर्णनीयोनिवर्णो दूरे [illegible] षिरचनापंकशंकांकरोति यद्यप्येवंसकलसुरभिद्रव्यगर्वापहारीकोजानीते
परिमलगुणाःकोपिक[illegible]यो ३८ तुल्येभूभृतिजन्मतुल्यमुभयोर्मूल्यंचतुल्यंवपुस्तुल्यंदार्ढ्यमुद
ग्रटंकदलनंतुल्यंचपाषाण[illegible]ना एकस्याखिलचंदनायविधिनादेवत्वमारोपितंतंद्वारेविहितापरस्पदाया
२५

46

नास्पदं देहली ३९ भ्रातः [illegible] जलावकमाकुरुसंतोषमन्यनिधनेन भ्रातस्तथैव धातुर्वामत्वंकिन्नुजा
नासि ४० आमाकुलित [illegible] पकरिणः किंगतंभवेत् बंधनास्थितिमातंगः सहस्तभरणासमः ४१
वसत्यरण्येषु चरंतिदूर्वा [illegible] तितोयान्यपरिग्रहाणि तथापि बध्याद्धरिणानराणां कोलोकमाराध
यितुंसमर्थः ४२ हंसीं कुरुतृणाद्धाराधन्यास्तातवनेमृगः विभूतीन्नतेचित्रानांनपश्यंतिमुखानियत्र
४३ नहारिहरिद्रावलीनपरितोवाणाखुजश्रेणयः किंचसौक्तिकमौक्तिकेमे गट्टशंतारानहारावलीः हे
कल्पद्रुमदूरतोस्तुभवतः सेवाभवं वैभवंउच्यामित्वपितावतापि यदिनस्मेरोभवतिद्विपः ४४ सर्वास्तुव्यः
समकटुरसास्तं विवल्लीप्रसूतासां वह्याअपिकृतिपयाउस्तरंतारयंते शाद्यायंतेसरमसपराः शुष्ककाष्ठे
निपन्नास्तन्मध्येन्याज्वलितहृदयाः श्रोणितं संपिबंति ४५ किंपुष्पंकिंफलंचास्यकसरस्याउरात्मनः॥
येनवृद्धिंसमासाद्यनकृतः पात्रसंग्रहः ४६ किंबांधवेनरविनाद्दरिनाथा किंचलक्ष्म्याचजलजोदरजेन
किंच एतस्यशुद्धचरितस्यसरोरुहस्य नैषातुषारजनिता शमिताविपत्तिः ४७ यन्मातावि[ष्णु]नाभिः पति

भ.र.

२४

रपि च सुतो यस्य साक्षात्प्रजानां लक्ष्मीं यः संश्रयाभूद्यदपि करतले भारती संबभार भानुर्यस्यास्ति मि
त्रं तदपि सरसिजश्रीणामिंदोमयूषैस्त्रातुं नैवोसहंते गतसुकृतफलं प्राप्तकालं सहाय ४८ दानेन
याचकैर्योर्चः क्षीणवित्तोपि सर्वदा शुष्कोपीदनदीपूरः खन्यते शालिलार्थिभिः ४९ चंद्रःक्षयीप्र
कृतिवक्रतनुर्जलात्मादोषाकरस्फुरतिमित्रविपत्तिकाले मूर्ध्नां तथापि विधृतः परमेश्वरेण नैवाश्रितेषु महतां
गुणदोषचिंता ५० क्षुद्राः संति सहस्रशः स्वभरणव्यापारमात्रोद्यताः स्वार्थो यस्य परार्थ एव स पुमानेकः स
तामग्रणीः दुःपूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो जीमूतस्तु निदाघसंभृतजगच्छंतापविच्छित्तये
५१ अन्योपि चंदनतरोर्महतीयमूर्तेः सेकार्यमुत्सहति तद्गुणबद्धतृष्णः सापोटस्य पुनरस्य महाशयो
यमंभोदस्येव शरणाय दिनिर्गतास्य ५२ चातकः स्वाभिमानेन जलं प्रार्थयते बुधान् सततुदार्थेतयानि
संप्लावयत्यंबुनामही [illegible] त्वयि वर्षति भीमेघा सर्वे पल्लविता द्रुमाः अस्माकं चार्कवृक्षाणां पूर्वेप
त्रेषु संशयः ५४ निःप [illegible] रेणाधीवरगणैर्निर्मत्स्यनिःकूर्मकं व्याधैर्निर्विहगं निरंबुरविनानि नी
लकं दंतिभिः निःशालूकप [illegible] ारिष्टकरणैर्नीमैकमात्रं सरो हे जीमूत परोपकारकरणव्याजेन मां

राम

२४

पूरयः ५५ गुणानामज्ञाना [illegible] भवतु ताव तु पति परं मुकूर्दारुछेद व्यतिकरमसौ स्वर्णविलयः अपिज्ञा
तेनखे तवगुणसमुद्रस्या [illegible] मंगुंजाफुजैस्तस्तनमति खेआकरमिदं ५६ किंतेनहेमगिरिणारजता
द्रिनावायस्याश्रिताहितरव [illegible] वस्तऐव वंदामहेमलयमारुतमेव येन शाखोटनिंबकुटजान्यपि चंदनानि
५७ रेरंगहेमतुलयातुलितोसिनि स्वंमानंजहीहिनहिपश्यसि नोविशेषं स्वर्णंतुरत्नघटितंनृपशेखरेषु त्वंपा
पयामरवधूचरणेषुलीनः ५८ अंभोजिनीवननिवासविलासमेहंसस्य हंतिनितरांकुपितोविधाता नत्वस्य
दुग्धजलभेदविधौप्रसिद्धां वैदग्ध्यकीर्त्तिमपहर्त्तुमयासमर्थः ५९ एकएवखगोमानी चिरंजीवितचातक पि
पासयावाम्रियतेयाचतेवापुरंदरं ६० खद्योतोद्योततेतावन् यावन्नोदयतेशशिं उदितेतुसहस्रांशोनख
द्योतोनचंद्रमा ६१ वनानिदहतोवह्नेः सखाभवतिमारुतः सएवदीपनाशायकृशेकस्यास्तिसौहृदं ६२
शैलेषुचगिरेःशृंगेषुचश्रीखंडेविभीतकेषुतथापूर्णेषुरिक्तेषुच स्निग्धेनध्वनिनाखिलेनपिजगच्चक्रे
समंवर्षतोवंदेवारिदसार्वभौमभवतोविश्वोपकारिव्रतं ६३ रेराजहंसकिमितित्वमिहागतोसि योसौव

49

कः स इह हंस इति प्रसिद्धः नक्रम्यतां पुनरितो भवतो स्वदेशं यावद्वदंति बक एव न मूढलोका ६४ ३
तिश्रीकरणाकुलालंकारपु॰ हरि॰रा॰विर॰ प्रस्तावरत्नाकरे अन्यापदेशः अथ धनप्रशंसा अर्थे
न परिहीनस्य पुरुषस्याल्पमेधसः क्रियाः सर्वे विनश्यंति ग्रीष्मेषुसरितो यथा १ यस्यार्थास्तस्य मित्रा
णि यस्यार्थास्तस्य बांधवाः यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पंडितः २ तानिंद्रियाण्यविकलानि
तदेव नामा सा बुद्धिरप्रतिहता वचनं तदेव अर्थोष्मणा विरहितः पुरुषः स एव शून्यः क्षणेन भवतीति वि
चित्रमेतत् ३ यस्यास्ति वित्तं स नरः कुलीनः स पंडितः स श्रुतवान् गुणज्ञः स एव वक्ता स च दर्शनीयः सर्व
गुणाः कांचनमाश्रयंति ४ न नरस्य नरो दासाः किंतु द्रव्यस्य भूपते गौरवं लाघवं चापि धनाधननिबंधनं
५ ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनं शशिनस्तुल्यवंशोपि निर्धनः परिभूयते ६ नाद्रव्ये निहिता
कांचित्क्रिया फलवती भ[illegible]व्यापारशतोनापि शुकवत्पाठ्यते बकः ७ त्यजंति मित्राणि धनैर्विहीनं
पुत्राश्च दाराश्च सुहृज्जना[illegible]मर्थवंतं पुनराश्रयंते चार्थो हि लोके पुरुषस्य बंधुः ८ किं चान्यैः स्व,

कुलाचारैः सेव्यतामेतिप[illegible] धनहीनः सपत्नीभिः त्यज्यतेकिंपुनःपरैः ९ श्रुतिवाग्दृष्टहरणांलक्ष्मीः
कुरुतेनरस्यकोत्रदोषः [illegible]हरजातीतच्चित्रंयन्नमारयति १० त्यजेत्क्षुधार्त्तामहिलाचपुत्रंखादेत
क्षुधार्त्ताभुजगीस्वमंडं बुभु[illegible]ः किंनकरोतिपापंक्षीणानरानिष्करुणाभवंति ११ मातातुष्यतिनाभिनंदति
पिताभ्रातानसंभाषतेभृत्यस्तुष्यतिनानुगच्छतिसुतःकांताचनालिंगते मित्रंचापिविनापराधकुपितोदृष्ट्वा
नसंभाषते तस्माद्द्रव्यमुपार्जनंकुरुसखेद्रव्येणसर्वेवशाः १२ हेदरिद्रनमस्तुभ्यंसिद्धोहंत्वत्प्रसादतः पश्या
म्यहंजगत्सर्वंनमांपश्यतिकश्चन १३ उत्थायहृदिलीयंतेदरिद्राणांमनोरथाः बालवैधव्यदग्धानांकुलस्त्री
णांकुचाविव १५ दरिद्र्याद्धियमेतिह्रीपरिगतःसत्वात्परिभ्रश्यतेनिःसत्वंपरिभूयतेपरिभवान्निर्वेदमाया
तिच निर्विण्णःशुचमेतिशोकविकलोबुध्यापरित्यज्यतेनिर्बुद्धिःक्षयमेत्यहोनिधनतासर्वापदामास्पदं
१६ शीलंशांतयतिश्रुतंशमयतिप्रज्ञांनिहंत्यादरंदैन्यंदीर्घयतिक्षमांक्षपयतिक्रीडामपिध्वंसयति ते
जोजर्जरयत्स्ययास्यतिधृतिंविस्तारयत्यार्थितांपुंसांक्षीणधनस्यकिंनकुरुतेवैरीकुटुंबग्रहः १७

KKSU LIBRARY
RAMTEK
441 106
M-1594
Dist. Nagpur

नावत्सर्वगुणाश्रयपटुमतिः साधुः सतां वल्लभः शूरः सच्चरिताः कलंकरहितः कांतः कृतज्ञः कविः दक्षो
धर्मरतः कुलीनकुशली तावत्प्रतिष्ठान्वितो यावन्निष्ठुरवज्रपातसदृशं देहीति नो भाषते १८ इति
श्रीकरणकुलालं॰ पुरुषो॰ सूनु॰ हरि॰ प्रस्ता॰ धनप्रशंसादारिद्र्यनिंदा स॰ अथ सज्जनप्रशंसा॥
विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्यपटुता युधि विक्रमः यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्ध
मिदं हि महात्मनं १ कुसुमस्तवकस्येव द्वे वृत्ती च मनस्विनाः सर्वलोकस्य वा मूर्ध्नि विशीर्यंते वनेपि वा २
मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति अतिनिर्वाणमायाति नानलो याति शीततं ३ एके सत्पुरुषा परा
र्थघटकाः स्वार्थं परित्यज्य ते सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ते मी मानुषराक्षसाः प
राहितं स्वार्थाय निघ्नंति ये ये तु घ्नंति निरर्थकं परहितं ते के न जानीमहे ४ उदये सविता रक्तो रक्तश्चास्त
मिते तथा संपत्तौ च विप[illegible] महतामेकरूपता ५ ये दीनेषु दयालवः स्पृशति यानल्पोपि न श्रीमद
दो व्याग्रा ये च परोपके[illegible] यंति ये याचिताः ६ स्वस्थाः संचितयौवनोदयमहाव्याधिप्रकोपेपि

येनैस्तंभैरिवसुस्थिरैः क[illegible]कांता धराधार्यते ६ येजाते व्यसनेनिराकुलधियः संपत्सुनोभिन्नतां
प्राप्तेनैवपराङ्मुखाः प्रण[illegible]प्राणप्रयोगैरपि ह्रीमंतः स्वगुणप्रकाशनविधावन्यस्तुतेपीडितास्तेभूमं
डलमंडनैकतिलकाः संतः कियंतोजना ७ संपदोमहतामेवमहतामेवचापदः वर्धतेक्षीयतेचंद्रोनतु
तारागणंक्वचित् ८ महात्मानोनुगृह्णंतिभजमानानिपूनपि सपत्नीःप्राप्नुवंत्यब्धिंसिंधवोनगनि
म्नया ९ अपकुर्वंनपिप्रायःप्राप्नोतिमहतःफलं और्वंदहंतमेवाग्निंसंतर्प्ययतिसागरः १० उप
कारिषुयःसाधुःसाधुत्वेतस्यकोगुणः अपकारिषुयःसाधुःससाधुःसद्भिरुच्यते ११ सुजनोनमाना
त्तिवैरंपरहितनिरतोविनाशकालेपि छेदेपिचंदनतरुःसुरभयतिमुखंकुठारस्य १२ अहोकिमपि
चित्राणिविचित्राणिमहात्मनां लक्ष्मींतृणायमन्यंतेतद्भरेणनमंत्यपि १३ इयमुन्नतिसत्वशालि
नांमहतांकापिकठोरचित्तता उपकृत्यभवंतिदूरतःपरतःप्रत्युपकारशंकया १४ वज्रादपिकठोराणि
मृदूनिकुसुमादपि लोकोत्तराणांचेतांसिकोहिविज्ञातुमर्हति १५ महतांप्रार्थनेनैवविपत्तिरभिशोभ

भ०र०
२७

ते दंतभंगोहिनागानांश्लाघ्योगिरिविदारणे १६ निंदंतुनीतिनिपुणायदिवास्तुवंतुलक्ष्मीःसमाविशतु
गछतुवंयथेष्टं अद्येववामस्तुयुगान्तरेवान्यायात्पथःप्रविचलंतिपदंनधीराः १७ येसंपत्सुविवादिनः
परयशःशल्येनमूलाकुलाकुर्वंतिस्वगुणास्तवेनगुणिनांयद्गुणाछादनं तेषांकोपकषायिनांदरदृशांको
पोष्मनिश्वासिनांदीप्तारलशिखेवकुष्मफणिन्याधिकसज्जनोद्वेगुणं १८ हृदयानिसतामेवकठिनानी
तिमेमति खलुवाग्विशिखैस्तीक्ष्णैर्भिद्यंतेनमनागपि १९ अंगणावेदीवसुधाकुल्याजलनिधिस्थलीच
पातालं वल्मीकश्चसुमेरुःकृतप्रतिज्ञस्यधीरस्य २० उपकर्त्तुंप्रियंवक्तुंकर्त्तुंस्नेहमकृत्रिमं सज्जना
नांस्वभावोयंकेनेंदुःशिशिरीकृतः २१ अतिकुपिताअपिताअपिसुजनायोगेनमृदूभवंतिनतुनीचा
हेम्नःकठिनस्यापिद्रावणोपायोस्तिनतृणानां २२ पादाहतंचउत्थायमूर्द्धानमधिरोहति स्वस्थादे
वोपमानोपिदेहिनस्तद्वरंरजः २३ युध्यंतिपक्षिपशवःपठंतिशुकसारिकाः दातुंशक्नोतियोवित्तं
सशूरःसचपंडितः २४ [illegible]र्णस्त्वचंशिविर्मांसंजीवंजीमूतवाहनः ददौदधीचिरस्थीनिनास्त्यदेयं

राम
२७

महात्मनां २५ द्विशरंना[illegible]धनोद्विःस्थापयतिनश्रितान् द्विर्ददातिनचार्थिभ्योरामोद्विर्नाभिभा
षते २६ यथाचित्तंतथावाचोयथावाचस्तथाक्रिया चित्तेवाचिक्रियायाचसाधुनामेकरूपता ॥
२७ नालिकेरसमाकाराविरलाःकेपिसज्जनाः अन्येतुवदरीकाराबहिरेवमनोरमाः २८ एकस्याम
मुदेतिमृद्वेनिगिरेरन्यस्यचेयक्रमादस्तंयातिकलानिधिस्तउभयोरस्तुप्रशस्तोचलः कोनामोदयिनं
करोतिनशिरोमाणिक्यमस्तंपुनर्योतंपतः कुरुतेभवानिवसद्गुणःप्रायोस्तिपृथ्वीतले २९ आपत्समुद्धर
णधीरधियःपरेषांगातामहत्यपिकुलेनभवंतिसर्वे विंध्याटवीषुविरलाःखलुपादपास्तेयेदंतिमुस
लोल्लिखनंसहंते ३० वरंकार्यंमौनंचवचनमुक्तंयदनृतंवरंक्लैव्यंपुंसांनचपरकलत्राभिगमनं वरं
प्राणत्यागोनचपिशुनवादेष्वनुरतिर्वरंभिक्षाशित्वंनचपरधनस्वादनरतः ३१ सर्पाःपिबंतिपवनं
नचदुर्बलास्तेशुष्कैस्तृणैर्वनगजाबलिनोभवंति मूलैःफलैर्मुनिजनाःक्षपयंतिकालंसंतोषएवम
हतांपरमंनिधानं ३२ निर्गुणेष्वपिसत्वेषुदयांकुर्वंतिसाधवः नहिसंहरतेज्योत्स्नांचंद्रश्चांडाल

वेश्मनि ३३ संपत्सुमहतांच्चित्तंभवेदुत्पलकोमलं आपत्सुचमहाशैलाशिलासंघातकर्कशं ३४
प्र.र. क्षीरेणात्मगतोदकायदिगुणादत्ताःपुरातेखिलाःक्षीरेतापमवेक्षतेनपयसास्वात्माकृशानौहुतः
२८ गंतापाककमुन्मनस्तदुभवद्दृष्ट्वातुमित्रापदंयुक्तंतेनजलेनशाम्यतिसतांमैत्रीपुनस्त्वीदृशी ३५
आरंभगुर्वीक्षयिणीक्रमेणलघ्वीपुरावृद्धिमुपैतिपश्चात् दिनस्यपूर्वार्द्धपरार्द्धभिन्नाछायेवमै
त्रीखलसज्जनानां ३६ एकःसएवजीवतिहृदयविहीनःसुहृद्दोराहुः यःसकलकलाधिमभाज
नमुद्गिरंनविजिर्डःपूरं ३७ भूतनूतनकूष्मांडफलानांकेभवंत्सामी अंगुलीदर्शनाद्येनविलीयंतेमन
स्विनः ३८ गवादीनांपयोन्येद्युःसद्योवाजायतेदधी क्षीरोदधेस्तुनाद्यापिमहतांविकृतिःकुतः ३९ रा
शरदिनवर्षतिगर्जतिवर्षतिवर्षासुनिस्वनोमेघाः नीचोवदतीनकुरुतेनवदतिसुजनःकरोत्येव ४० २८
मुखान्नोदीरयत्यूर्द्धहृदयान्ननपस्यधः जरयत्यनिशंसाधुर्दोषंविषमिवेश्वरः ४१ यच्चिंतितंतादिहदु
रतरंसयातियच्चेतसापिनकृतंतदिहाभ्युपैति इत्थंविधेर्विधिपर्ययमाकलप्यसंतःसदासुरसरितेट

माश्रयंति ४२ प्राणाघातान्निवृत्तिं परधनहरणेसंयमः सत्यवाक्यंकालेशक्त्याप्रदानंयुवतिजनक
थामूकभावःपरेषां तृष्णास्रोतोवियोगोगुरुषुचविनयः सर्वभूतानुकंपासामान्यःसर्वशास्त्रेष्वनुपहत
विधिःश्रेयसामेषपंथा ४३ नाप्रार्थ्यमभिवांछंतिनष्टंनेछंतिशोचितुं आपत्स्वपिनमुह्यंतिनराःपंडि
तबुद्धयः ४४ किंकूर्मस्यभरव्यथानवपुषिक्ष्मींधारयत्येवयःकिंवानास्तिपरिश्रमोदिनपतेरास्तेनयन्नि
श्चलः किंत्वंगीकृतमुत्सृजन्नकृपणवत्श्लाघ्योजनोलज्जतेनिर्वाहःप्रतिपन्नवस्तुनिसतामेतद्धिगो
त्रव्रतं ४५ अद्यापिनोसतिहरःकिलकालकूटं कूर्मोबिभर्त्तिधरणींखलुपृष्ठकेन अंभोनिधिर्वह
तिदुःसहवाडवाग्निमंगीकृतंसुकृतिनःपरिपालयंति ४६ पतितोपिकराघातैरुत्पतत्येवकंदुकः प्राये
साधुवृत्तीनामस्थायिन्योविभूतयः ४७ प्रायःकंदुकवन्नोपतत्यार्यःपतन्नपि तथात्वनार्यःपतति
मृत्पिंडपतनंयथा ४८ इतिश्रीकरुणाकुला० सज्जनप्रसंसास० अथउद्यमाख्यानं उद्योगि
नंपुरुषसिंहमुपैतिलक्ष्मीः दैवंहिदैवमितिकापुरुषावदंति दैवंविहत्यकुरुपौरुषमात्मशक्त्यायत्नेकृते

यदिनसिध्यतिकोत्रदोषः १ आलस्यंहिमनुष्याणांशरीरस्थोमहारिपुः नास्त्युद्यमसमावंधुःकुर्वाणो
प्र.र. नावसीदति २ उद्यमःसाहसंधैर्यंबलंबुद्धिपराक्रमं षडेतेयत्रतिष्ठंतिदैवंतस्यापिशंकयेत् ३ उत्साहसं
पन्नमदीर्घसूत्रंक्रियाविधिज्ञंव्यसनेष्वशक्तं शूरंकृतज्ञंदृढसौहृदंचलक्ष्मीःस्वयंयातिनिवासहेतोः ४
२९ अव्यवसायिनमलसंदैवपरंसाहसाच्चपरिहीनं प्रमदेवहिवृद्धपतिंनेच्छत्युपगूहितुंलक्ष्मीः ५ आलस्यं
स्त्रीसेवासरोगिताजन्मभूवात्सल्यं संतोषोभीरुत्वंषड्व्याघातामहत्त्वस्य ६ वोहित्थंअश्ववाणिज्यंराजसे
वातपोवनं धीराःचत्वारिकुर्वंतिकृषिःकुर्वंतिकातराः ७ गच्छन्पिपीलिकापंक्तिःसमुद्रमपिगच्छति आ श
गच्छन्वैनतेयोपिपदमेकंनगच्छति ८ उद्यमेनहिसिध्यंतिकार्याणिनमनोरथैः नहिसुप्तस्यसिंहस्यप्रविशं
तिमुखेमृगाः ९ नाकालेम्रियतेकश्चित्प्राप्तकालेनजीवति एवंकालंसमालोक्यनकुर्यान्मृत्युतोभयं ॥ २९
१० नपुत्रत्वेनपूज्यंतेगुणोराराधनेपरं रवेर्व्यापारमारत्ते प्रदीपोनपुनःशनिः ११ किंजन्मनाजगति
किंपितृपौरुषेणशान्त्याहियातिनिजयापुरुषःप्रतिष्ठा शक्त्याहिकूपमपिशोषयितुंनकुंभाः कुंभो

ड्वेनमुनिनांबुद्धिरेवपीतः १२ इतिश्रीकरणकुलालंकारपुरु०उद्यमाख्यानपरिछेदः समाप्तः
अथदैवाख्यानं मज्जत्वंभसियातुमेरुशिखरंशत्रुंजयत्वाहवेवाणिज्यंकृषिसेवनादिस
कलाविद्याःकलासिक्षतुः आकाशंविपुलंप्रयातुखगवत्कृत्वाप्रयत्नंपरंनाभाव्यंभवतीहकर्मवशतो
भाव्यस्यनाशःकुतः १ यद्धात्रानिजभालपट्टलिखितंस्तोकंमहद्वाधनंतत्प्राप्नोतिमरुस्थलेपिनितरां
मेरौततोनाधिकं तद्धीरोभवतिवित्तवत्सुकृपणांवृत्तिंवृथामाकृथाः कूपेपश्यपयोनिधावपिघटोगृह्णा
तितुल्यंजलं २ उदयतियदिभानुःपश्चिमेदिग्विभागेप्रचलतिमेरुःशीततांयातिवह्निः विकसतियदिप
द्मंपर्वताग्रेशिलायांनहिचलतिनराणांभाविनीकर्मरेखा ३ पत्रंनैवयदाकरीरविटपेदोषोवसंतस्यकिंनो
लूकोपिविलोकतेयदिदिवासूर्यस्यकिंदूषणं वर्षानैवपतंतिचातकमुखेमेघस्यकिंदूषणंयत्पूर्वंवि
धिनाललाटलिखितंतस्माज्जीतुंकःक्षमः ४ कुत्रायोध्याक्करामोदशरथवचनाद्दंडकारण्यमार्गात्
क्कासौमारीचनामाकनकमयमृगःक्वत्रसीतापहारः सुग्रीवेराममैत्रीक्कजनकतनयान्वेषणेप्रेषि

भ·र·
३०

तोहं योर्थः संभाविनी यस्तमपि घटयति क्रूरकर्मा विधाता ५ महतांस्थानमाश्रित्य फलं कर्मानुसा
रितः महेशकंठलग्नोपि ग्रासंभक्षति वासुकिः ६ किंकरोति नरः प्राज्ञः शूरो वा पंडितोथ वा दैवं यस्य
छलान्वेपि करोति विफलाः क्रियाः ७ गुणापि दोषतां याति वक्रीभूते विधातरि सानुकूले पुनस्त
स्मिन् दोषोपि च गुणायते ८ सिंहो वली गिरिगुहागहनप्रवासी वासादरे वसति भूमिभृतां बिडालः
नो पौरुषं कुलमपि प्रभुता न वाणी दैवं बलीय इति मुंच सखे विषादं ९ मातरः पितरश्चापि बांधवाः
सुहृदोपरे नहि स्मरंति स्वजनं यस्य दैवमरक्षितं १० अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं वि
नश्यति जीवत्यनाथोपि वने विसर्जितः कृतः प्रयत्नोपि गृहे न जीवति ११ पत्राखंडलदंतिदंतमुशला
न्यास्खंडिता न्याहवे धारा यत्रापिनाकपाणिपरशोराकुंठिता तन्मेतावदुरोनृसिंहकरजैर्व्यादीर्यते सां
प्रतं दैवे दुर्जनतां गते तृणमपि प्रायेण वज्रायते १२ अवश्यंभाविनो भावा भवंति महतामपि नग्नत्वं
नीलकंठस्य महाहिशयनं हरे १३ पुरुषः पौरुषं तावद्यावद्दैवं हि संमुखं । विपरीतगते दैवे पुरुषो न च

३ वक्षसि

राम
३०

पौरुषं १४ अत्यंतविमुखेदैवेव्यर्थयत्नेचपौरुषे मनस्विनोदरिद्रस्यवनादन्यत्कुतःसुखं १५ अप्रार्थि
तितानिदुःखानियथैवायातिदेहिनां सुखान्यपितथामन्येदैन्यमत्रातिरिच्यते १६ यथाह्येकेनचक्रे
णानरथस्यगतिर्भवेत् एवंपुरुषकारेणविनादैवंनसिध्यति १७ ब्रह्मायेनकुलालवन्नियमितोब्रह्मां
डभांडोदरेविष्णुर्येनदशावतारगहनेक्षिप्तोमहासंकटे रुद्रोयेनकपालपाणिपुटकेभिक्षाटनंका
रितःसूर्योभ्राम्यतिनित्यमेवगगनेतस्मैनमःकर्मणे १८ नमस्यामोदेवान्ननुहतविधेस्तेपिवशगा
विधिर्वंद्यःसोपिप्रतिनियतकर्मैकफलदः फलंकर्मायत्तंयदिकिममरैःकिंचविधिनानमस्तत्कर्मभ्यो
विधिरपिनयेभ्यःप्रभवति १९ स्ववशःकरोतिकर्मप्रमादस्तुपरवशोभवति स्ववशोरोहतिहस्तंनि
पतत्यवशास्ततःपुरुषः २० अन्यमनोरथशतैरपिगोचरंनसमायातिकवयोगिराम् स्वप्नवृत्तिरपियत्र
दुर्लभालीलयैवविदधातितद्विधिः २१ खल्वाटोदिवसेश्वरस्यकिरणैःसंतापितोमस्तकेवांछन्देश
मनातपंविधिवशाद्बिल्वस्यमूलंगतः तत्राप्यस्यमहाफलेनपतताभग्नंसशब्दंशिरःप्रायोगच्छतिय

अभाग्यरहितः तत्रापदांभाजनं २२ भाग्यवंतंप्रसूयेथामाशूरंमाचपंडितं शूराश्चकृतविद्याश्चव
नेसीदंतिपांडवाः २३ मातुलोयस्यगोविंदोपितायस्यधनंजयः सोपिकालवशंप्राप्तः कालोहिदुरति
क्रमः २४ वनेरणेशत्रुजलाग्निमध्येमहार्णवेपर्वतमस्तकेवा सुप्तंप्रमत्तंविषमस्थितंवारक्षंतिपुण्या
निपुराकृतानि २५ भीमंवनंभवतितस्यपुरंप्रधानंसर्वेजनाःसुजनतामुपयांतितस्य कृत्स्नाचभूर्भव
तिसंचितरत्नपूर्णायस्यास्तिपूर्वसुकृतंविपुलंनरस्य २६ आयुःकर्मचवित्तंचविद्यानिधनमेवच पं
चैतान्यपिसृज्यंतेगर्भस्थस्यैवदेहिनः २७ निमग्नस्यपयोराशौपर्वतात्पतितस्यच तक्षकेनापिदष्ट
स्यआयुर्मर्माणिरक्षति २८ नैवाकृतिःफलतिनैवकुलंनशीलंविद्यापिनैवनचयत्नकृतापिसेवा भा
ग्यानिपूर्वतपसाकिलसंचितानिकालेफलंतिपुरुषस्ययथैववृक्षाः २९ नकालःखड्गमुद्यम्यशिरःकृंत
तिकस्यचित् कालस्यबलमेतान्चविपरीतार्थदर्शनात् ३० जानन्नपिनरोदैवात्प्रकरोतिविगर्हितं
नकर्मकस्यचिल्लोकेगर्हितंरोचतेकृतं ३१ शशिदिवाकरयोर्ग्रहपीडनंगजभुजंगमयोरपिबंधनं।।

मतिमतांच विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ३२ कांतंवक्ति कपोतिकाकुलतया ना
थांतकालोधुना व्याधोधो धृतचापसंधितशरःसेनाःपरिभ्राम्यति एवंसत्यहिनासदष्टइषुणास्य
नस्तेनाहतस्तूर्णंतौतुगतौयमालयमहोदैवीविचित्रागतिः ३३ इतिश्रीकरणकुतूहलालं
कारपुरु० हरि० दैवाख्यानंस० अथदुर्जननिंदा: दुर्जनःपरिहर्तव्योविद्ययालंकृतोपि
सन् मणिनाभूषितःसर्पःकिमसौनभयंकरः १ खलःकरोतिदुर्वृत्तंनूनंफलतिसाधुषु दशाननो
हरेत्सीतांबंधनंस्यान्महोदधे २ बहुप्रकारैरपिसेव्यमानोनदुर्जनःसज्जनतामुपैति संसिच्यमा
नःपयसाघृतेननिंबवृक्षोमधुरत्वमेति ३ दुर्जनेनसमंसख्यंसख्यंचैवनकारयेत् उष्णोदहतिचां
गारःशीतःकृष्णायतेकरं ४ परापवादवादेनविनादोषेणदुर्जनः काकःसर्वरसान्भुंक्तेविनामेध्यं
नतृप्यति ५ पोतोदुस्तरवारिराशितरणेदीपोंधकारागमेनिर्वातेव्यजनंमदांधकरिणांदर्पोपशांत्यैसृ
णिः शास्त्रंतद्भुविनास्तियस्यविधिनानोपायचिंतामन्येदुर्जनचित्तवृत्तिहरणेधातापिभग्नोद्यमः ६
कृता

दु.र.
३२

आक्रोषितोपिसुजनोनवदत्यवाच्यंनिष्पीडितोमधुरमुद्गिरतीक्षुदंडः नीचोजनोगुणशतैरपिसेव्य
मानोहास्येनतद्ददातियत्कलहेप्यवाच्यं ७ खलः सर्षपमात्राणिपरछिद्राणिपश्यति आत्मनोबिल्वमा
त्रापश्यन्नपिनपश्यति ८ अपूर्वारसनाव्यालीखलाननविलेशया कर्णमूलेस्पृशत्यन्यं हरत्यन्यस्य
जीवितं ९ विषमामलिनात्मानोद्विजिह्वाजिह्मगाइव जगत्प्राणहरानित्यंकस्यनोद्वेगदाखलाः १०
निमित्तमुद्दिश्यहियःप्रकुप्यतिध्रुवंचतस्यापगमेप्रसीदति अकारणद्वेषिमनोस्तियस्यकथंजनस्तंपरि
तोषयिष्यति ११ वक्रतांधारयान्नयस्यगुह्यमंतःप्रकाशते कथंचनसमानःस्यात्पुच्छेनपिशुनःशुनः
यथायथैवस्नेहेनभूयिष्ठमुपचर्यते धत्तेतथातथातापंमहावैश्वानरःखलः १३ स्तोकेनोन्नतिमा
यातिस्तोकेनायात्यधोगतिं अहोनुसदृशीवृत्तिस्तुलाकोटेःखलस्यच १४ नेवात्मनोविनाशंगणयतिपि
शुनःपरव्यसनसंहृष्टः प्राप्यसहस्रविनाशंसमरेनृत्यत्कबंधइव १५ दह्यमानाःसुतीक्ष्णेननीचाःपरयशोग्नि
ना. अशक्तास्तत्पदंगंतुंततोनिंदांप्रकुर्वते १६ काकःस्वभावचपलःपशुघातिन्नध्यावालिंस्वजनमाह्वयते
परंच चर्मास्थिमांसमयहस्तिकलेवरंचस्वादेलिहन्मिचपरान्कृपणस्वभावः १७ इतिश्रीक०दुर्जननिंदास०

राम
३२

मातः अथकूटाख्यानं सुवर्णालंकृताकन्याहेमालंकारवर्जिता साकन्याविधवाजातागृहे रो
दतितत्पतिः १ विद्युत्प्रकटीकृता अपदोदूरगामीचसाक्षरोनपंडितः अमुखस्फुरद्वक्ताचयोजानातिसपं
डितः पत्रीप्रकटीकृतः २ छत्रधारीनवैराजोजटाधारीनचेश्वरीः सूछिकर्णोनसद्ब्रह्माछिद्रकर्णोनतस्करः
कूष्मः ३ वनेजातावनेत्यक्तावनेतिष्ठतिनिस्पृशः पण्यस्त्रीनचवेश्यासायोजानातिसपंडितः नौकाप्र
कटीकृतः ४ आद्येवद्दीनंजलधावद्दश्यंमध्येनंभुविवर्णनीयं अंतेनदीर्नधनेनशरीरं हेमाविधःसश्रिय
मातगोतुः करजः ५ गोपालोनैवगोपालःत्रिशूलीनैवशंकरः चक्रपाणिर्नयोविष्णुःयोजानातिसपंडि
तः मत्स्याप्रकटीकृतः ६ केदारेकीदृशोमार्गःकुशोतेजनार्दनः स्त्रीचित्तंकुत्ररमतेस्वामीकिंवक्तिचेटिकं
उपरीपायसिनरे ७ कः कुर्याद्भुवनंसर्वंकःसमुन्मलयेद्रुमां कंप्रतीकिंभवेन्मुख्यंकंपरत्रेतिपुन्यतः ८
कांतंवसंतसमयेवदकीनरूणांकिंक्षीयतेविरहिणासु—णाःकिमेति किंकुर्वतेमधुकरामधुपानमत्ताःकी
दृग्वनंमृगगणाःपरितत्यजेयुः दवविकलं ९ स्नानार्थंनिर्गतानार्याएकोनविंशांतिस्त्रियः नक्रेनरवा

ला

दितोप्येकोविंशतिर्हमागताः १० आगताःपांडवाःसर्वेदुर्योधनसमीहया तस्मैगांश्चसुवर्णंचरत्नानि
विविधानिच ११ कांतारुचिर्मुनिजनस्तरुणोवियोगीकामश्चरत्नमणिमुञ्चलकंकणेन धनेपयो
धरतटेकुचभूषणेनहारेहरोहिमकरेमकरेकरेच १२ कोनिर्दग्धास्त्रिपुराणकश्चकर्णेश्चेहंतानद्याःकू स्य
लंविघटयतिकःपरस्त्रीरतश्च कःसंनद्धोभवतिसमरेभूषणांकिंकुचानांकिंदुःसंगाद्भवतिमहतांमान
पूजापहार १३ अन्नंवस्त्रसुवर्णानिरत्नानिविविधानिच ब्राह्मणेभ्योनदीतीरेददातिअजसत्वरं १४
हेब्राह्मणाइभ्यःसमर्थः गौरीनरवरसाहश्यपश्यइयाशशिनंरधौ इहेवगोप्यतेकत्तोवर्षेणापितनम्यते १५
इःकामःतंहंतीतिइहाईश्वरः उच्छिष्टंशिवनिर्माल्यंवमनंशवकर्पटः काकविष्ठासमुत्पन्नाःपंचैतेतिपवि
त्रिता १६ उच्छिष्टंदुग्धं शिवनिर्माल्यंगंगा वमनंमधु शवकर्पटःपट्टांवरं काकविष्ठासमुत्पन्नाःपिप्प
लादयाः इतिप्रकटीकृता विजितात्मभवद्वेषिगुरुपादहतोजनः हिमापहामित्रधरैर्व्याप्तंव्योमाभिनंद
ति १७ विनागरुडेनाजितइंद्रः नरात्मभवश्चअर्जुन तद्वेषीकर्णः तद्गुरुःसूर्यः तत्पादहतःतल्किर

तासंतप्तः हिमापहाग्निः तदमित्रंपाणीयं तद्वैरीमेघः प्रकटीता तरुण्यालिंगताः कंठेनितंबस्थूलमि
श्रितः शत्रुणांसंन्निधानेपिकः पूजनिमुहुर्मुहुः कलशः केशवंपतितंदृष्ट्वाद्रोणोहर्षमुपागतः रुदंतिको
रवाः सर्वेहाहाकेशवकेशव केजलेशवं मृतकंद्रोणः कृष्णकाकः कौरवाः शृगालाः प्रकटीकृता अं
बरसंबुनिपत्रमरातिःपीतमहीनगणास्यददाह यस्यवधूस्तनयंगृहबद्धा पातुसवोहरलोचनवह्निः २०
दृशान्वयंसवोयुष्मान्पातुयस्यअंबरंपीतं यस्यगृहं अंबुनि यस्यपत्रंअहीनगणास्यअरातिः यस्यवधू
अब्धा यस्यतनयंहरलोचनवह्निर्ददाह लक्ष्मीपदोनिधेर्यादोगादोवादोचितंवचं विभ्यतीधीवरेभ्यो
याजडेष्वेवनिमज्जति २१ लक्ष्मीपादोनिवासस्समुद्रस्यपादः जलजंतुः अदोवचः यादोश्चितंनाय
तोधीवरेभ्योविचक्षणेभ्योविभ्यतीत्रस्यंतीजडेष्वेवकर्दमेष्वेवनिमज्जतितिष्ठति पानीयंपातुमिच्छामि
त्वत्तःकमललोचने यदिदास्यसिनेच्छामिनोदास्यसिपिबाम्यहं २२ नदीजलंकेशवनारिकेलुनेगा
ढयोनामनगारिस्तनुः एषोगनावेषधरःप्रमाथीजित्वावयंनेष्यतिचाद्यगावः २३ नदीजोनाम

प्र.र.
३४

तोभीष्मः एषदृश्यमानः अंगनावेषधरः स्त्रीरूपधारी लंकेशवनारिकेतुः वानरध्वजः नगायः अर्जु
ननामयतः किंभूतः नगारिसूनुः इंद्रपुत्रः उभौ कौरवाः अयंप्रमाथीहंता अद्यवोयुष्मान्जित्वागाश्च
नेष्यति २३ केभूषयंतिस्तनमंडलानि कीदृक्सुमाचंद्रमसः कुतश्री किमादसीतास्यवक्रेनीताहा
रामहादेवरतातमाता २४ रवेः कवेः किंसमरस्यसारंकृपेर्भयंकिंमुशांतिंचभंगोः खलाड्गयंविस्तुप
दंचकेषांभागीरथीतीरसमाश्रितानां २५ किंक्रूरंस्त्रीकिंगृहिणाःप्रियदितायदारगुणाः कःकामः
संकल्पःकिंदुःकरःसाध्यमाशामाउ २६ किंश्रुतोपितरंबालःकिंदृस्वारमतेनरः कस्मिन्नूस्वपिति
कंसारीकावृत्तिरधमानरः २७ प्रश्नोत्तरंकिंशोषेसेवावापरूपं अथप्रश्नोत्तरेषु-- किंयन्मा
त्रंजलंविप्रजानुदघ्नंनराधिप तथापीषमवस्थातेनहिसर्वेभवादृशः २८ अथसमस्य असमानेस
मानत्वंभविताकुलंदंमम इतिमत्वाधृवमानीमृगात्सिंहोःपलायते २९ विद्यायांदुर्मुखंयेषांकार्पण्यं
विभवेसति ततोदेवाभिशापानांसलिलादग्निरुत्थितः ३० दामोदरकराघाताद्विकलीकृतचेतसा दृष्टंचा

र
३४

(68)

णूरमल्लेनश्रातन्वं इंद्रनभस्तलं ३१ ग्रीष्मेषुग्रीष्मसंतापशून्यरथ्यांतरस्थयोः अन्योन्यालापमु
खिनोयूनोश्चंद्रायतेरविः ३२ इतिपदैकंसमस्य सीतासमागमोत्कंठिकर्णान्ताकृष्टधन्विनः राघ
वस्यशरांगारैःसमुद्रादग्निरुत्थितः ३३ समुद्रादग्निरुत्थितइतिपदैकंसमस्या स्वस्तिक्षत्रियदेवाय
जगद्देवायभूभुजे यशसःपुंडरीकांतगगनंभ्रमरायते ३४ गगनंभ्रमरायतेइतिपदैकंसमस्या रथस्यैकं
चक्रंभुजगयमिताःसप्ततुरगानिरालंबोमार्गश्चरणरहितःसारथिरपि रविर्गच्छत्यंतंप्रतिदिनमपारस्यनभसः
क्रियासिद्धिःसत्वेवसतिमहतांनोपकरणे ३५ क्रियासिद्धिःसत्वेवसतिमहतांनोपकरणपदैकंसमस्या॥
विजेतव्यालंकाचरणतरणीयोजलनिधिर्विपक्षःपौलस्त्योरणभुविसहायाश्चकपयः तथाप्येको
रामःसकलमवधीद्राक्षसकुलंक्रियासिद्धिःसत्वेवसतिमहतांनोपकरणे ३६ अस्माकंजेलजीवि
नांजलमिदंसद्वाजिराजिव्रजैःपातव्यंपररक्तरक्तमनसांतृप्तिःपतीनांक्षपः मल्लेवंमहराजदेवनृपते
लक्षेत्रपात्रोत्सवेमसीरोदतिमक्षिकाश्चहसतिध्यायंवामभ्रुवः ३७ मसीरोदतिमक्षिकाश्चहसतिध्या

प.र.
३५

यंतिवाममकवः इतिपदैकंसमस्या ३७ स्फुरतीजठरेविष्णोनवनीतभुजःशिशो मक्षिकापादघाते
नकंपितंभुवनत्रयं ३८ अतसीपुष्पसंकाशंखवीक्ष्यजलदागमे येवियोगेपिजीवंतीनतेषांविद्यतेभ
यं ३९ अतसीपुष्पशंकाशमितिपदैकंसमस्या ममकरग्रहणायपणीकृतंयदिनराघवतोप्यधि
रोहति सखितदेवममभून्ममजीवितंशशकशृंगमयंकठिनंधनुः ४० शशकशृंगमयकठिनंधनुःइति
पदैकंसमस्या रामाभिषेकेमदविह्वलायाकराच्च्युतोहेमघटस्तरुण्याः सोपानमासाद्यकरोतिशब्दं
ठंठंटटंटंटठठठंठठंठः ४१ इतिश्रीकरणकुलालंकारपुरुषोत्तमसूनुहरिदासविरचितेप्रस्ताव
रत्नाकरेकूटाख्यानंसमाप्तः अथसदाचारः कुचैलिनंदंतमलोपधारिणंबह्वाशिनंनिष्ठुर
वाक्यभाषिणं सूर्योदयेचास्तमयेचशायिनंविमुंचतिश्रीरपिचक्रपाणिनं १ प्रेतधूमेविरेकेचवांतेचतु
रकर्मणि दुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयते नस्नानमाचरेभुक्त्वानातुरोनमहानिशि नवस्त्रैःसह
नाजस्रंनाविज्ञातेजलाशये निस्समास्यंस्तुचित्रीणांशकुंतेःफलपातने वसोपिस्तनपानेस्यात्वाम्रगत्र

रा
३५

70

हणोश्रुचिः बालार्कंप्रेतधूमंचवृद्धस्त्रीपल्वलोदकं आयुःकामोनसेवेतरात्रौचदधिभोजनं ५ दीपोपशमनंपुंकूष्मांडछेदनंस्त्रियः अचिरेणैवकालेनकुलछेदोभवेध्रुवं आलांबुवर्त्तुलाकारंवर्त्तुलंकंदसंनिभं प्राणांतेपिनचाश्नीयात्समस्तरान्नंसवल्कलं अपक्वान्नानवीक्षेतनावगाहेत्सपोरयं संदिग्धनावंनारोहेन्नबाहुभ्यांनदींतरेत् सर्वथासंत्यजेद्वैरंनकंचिन्मर्मणिस्पृशेत् ८ सर्वान्परित्यजेदर्थान्स्वाध्यायस्याविधानतः देवालयंचत्वरंचनक्तंसेवेतनद्रुमान् शून्याटवींशून्यगृहंश्मशानंचदिनेष्वपि १० देवाधिकारिणोम्लेछान्विकर्मस्थान्द्विजानपि विलोक्यायउपस्पृशेस्पृष्ट्वाकजलमाविशेत् प्रवह ब्राह्मणंतोयंतडागेक्षत्रियोदकं वापीकूपगतंवैश्यशूद्रस्यघटभांडकं गछेदेकोनपंथानंस्वयंनोपानहौहरेत् शिरसानवहेद्भारंनवधावेतवर्षति मात्रास्वस्रादुहित्राचनविविक्तासनोभवेत् बलवानिंद्रियग्रामोविद्वांसमपिकर्षति शय्यादीपाधमस्तंभछायांदूरेणसंत्यजेत् नमीलायनेकुर्वीतधीमानपरिजनैःसह १५ अजाश्वमुखतोमेध्यागावोमेध्याश्चपृष्ठतः ब्राह्मणापादतोमेध्याः

प्र॰र॰ सर्वगात्रेषुयोषितः १९ नद्यस्यद्यस्त्यपरिभ्रष्टंयच्चावर्त्तसमन्वितं गतप्रत्यागतंचैवतत्तोयंपरिवर्जे
येत् जलंपिवेन्नांजलिनाशयानंनप्रबोधयेत् परान्नंचारयंतीगांधयंतीन्नचवाधयेत् नोत्तर
३६ स्यांप्रतीच्यांचकुर्वीतशयनंशिरः शय्याविपर्ययाद्गर्भोदितेशक्रेणदारितः प्राक्शिरःशयने
विद्याधनमायुश्चदक्षिणे पश्चिमेप्रबलाचिंताहानिमृत्युस्तथोत्तरे २० नोर्द्ध्वजानुश्चिरंतिष्ठेन्न
स्यात्कुक्कुटासनः ननासिकांवाकुष्णीयान्नस्वयंकर्त्तयेन्नखान् शीताम्बुसुनिषिच्योष्णामंत्रसं
भारसंभृताः स्नानंगृहेपिकुर्वाणःप्राप्नोतिस्नानजंफलं २२ नाग्नींमुखेनधमयेत्नाधःकुर्यान
लंघयेत् नामेध्यंप्रक्षिपेद्वह्नौनचपादौप्रतापयेत् नाकश्चिदपिजानातिकिंकस्यश्वोभविष्यति रा॰
अतश्चकरणीयानीकुर्याद्द्यैवबुद्धिमान् हृताधिकारांमलिनांपिंडमात्रोपिजीवतीं परिभूतांध
मःशय्यांवासयेद्व्यभिचारिणीं २५ केशकीटोचपन्नेचगोघ्रातेमक्षिकान्विते मृदंबुभस्मनातद्वत् ३६
प्रक्षेप्तव्यंविशुद्धये २६ शिरःसुधौतंचरणौसुनिर्मलौवरांगनासेवनमल्पभोजनं अनग्नशायि

त्वमपर्व्येमैथुनंचिरप्रनष्टांश्रियमानयंति अजागावोमहिष्यश्चब्राह्मणीचप्रसूतिका दशाहेनैवशु
ध्यंतिभूमिष्ठमुदकंनवं नास्तियज्ञक्रियाकिंचिन्नव्रतंनोपवासकं यातुभर्त्तरिशुश्रूषातयास्वर्गंजय
त्यसौ मृतेभर्त्तरियानारीब्रह्मचर्य्येव्यवस्थिता मृतासालभतेस्वर्गंयथातेब्रह्मचारिणः ३० आ
त्मार्थंयःपशुंहन्यात्सोवश्यंनरकंव्रजेत् देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोषभाक् एकछागं
द्विरावेश्यंत्रिगवंपंचमाहिषं षडश्वंसप्तमातंगंशक्रस्यापिश्रियंहरेत् पुनःप्रभातेपुनरेवशर्वरीपुनः
शशांकःपुनरुद्यतेरविः कालस्यकिंगच्छतियातियौवनंतथापिलोकेकथितंनबुध्यते द्रव्यक्रीतातुयाना
रीनसापत्नीविधीयते नसादैवेनसापित्र्येदासींतांकश्यपोब्रवीत् अग्राह्यंशिवनिर्माल्यंपत्रंपुष्पंफलंज
लं शालिग्रामशिलालग्नंसर्वंयांतिपवित्रतां आदित्यचंद्रावनिलानलौचद्यौर्भूमिरापोहृदयंयमश्च
अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तं ३६ देवताषुगुरौगोषुराजषुब्राह्मणेषुच नियंतव्यः
सदाकोपोबालवृद्धातुरेषु मातृवत्परदारेषुपरद्रव्येषुलोष्टवत् आत्मवत्सर्वभूतेषुयःपश्यतिसपंडितः ॥

73

ग्र·र· नदेवोविद्यतेकाष्टेपाषाणेनचमृन्मये भावेषुविद्यतेदेवः तस्माद्भावोहिकारणं अन्यायोपार्जितंद्रव्यंदश
३७ वर्षाणितिष्ठति प्राप्तेचैकादशेवर्षेसमूलंचविनश्यति ४० सत्यंहंतिसुतंहंतिहंतिपुण्यंपुराकृतं स्वर्गेपिवा
पितृन्हंतियःसाक्ष्यमनृतंवदेत् लोभमूलानिपापानिरसमूलानिव्याधयः स्नेहमूलानिदुःखानित्रीणित्य
क्त्वासुखीभवेत् नान्नोदकात्परंदानंनमातुर्दैवतंपरं नभिक्षोःचपरंपात्रंनतिथिद्वादशीपरा प्रतिग्राही
परित्यज्यविप्रोभवतिमर्कटः अरण्येनिर्जलेदेशेदाताभवतिजंबुकः असत्क्रीडादिवानिद्रांपुनर्भोजनं
मैथुनं शाकंमधुपरान्नंचनकुर्यात्पारणादिने संक्रांतौरविवारेचग्रहणेचंद्रसूर्ययोः पारणंचोपवा
संचनकुर्यात्पुत्रवान्गृही गुरुंहुंकृत्यतुंकृत्यविप्रंनिर्जित्यवादतः अरण्येनिर्जलेदेशेसभवेब्रह्मराक्षसः
सिंहप्रसूतायागावोमकरेमहिषीतथा स्वामिनोवधमिच्छंतिश्रावणेवडवादिवाः अग्नौदग्धंजलेमग्नंय राम
न्नीतंचौरपार्थिवैः तत्सर्वंपरलोकायविनाद्यूतेनहारितं लशुनंगृंजनंचैवपलांडुग्रामकुक्कुटं छत्रा ३७
कंविड्वराहंचभुक्त्वाचांद्रायणंचरेत् ५० आदानस्यप्रदानस्यकर्तव्यस्यचकर्मणः क्षिप्रमक्रियमाना

५

स्यकालेःपिवतितद्रसं तस्यंर्यभोजनंयेषांसंतानार्थंचमैथुनं वाकुसस्यवचनार्थायदुर्गार्यपित
रंतिते उद्वेगःकलहःकंडूद्यूतमद्यपरस्त्रियः आदारेमैथुनंनिद्रांसेव्यमानंतुवर्द्धयेत् नमांसभ
क्षणेरोनमद्येनचमैथुनं प्रवृत्तिरेषाभूतानांनिवृत्तिस्तुमहाफलां शनिभौमादिनेश्राद्धेकुहूषष्ठीनि
रंशके वस्त्राणांक्षारसंयोगोद्रद्वस्यासप्तमकुलं ५५ षष्ठीषुतैलंफलमष्टमीषुक्षौरक्रियांचैवचतुर्द
शीषु स्त्रीसेवनंनष्टकलासुपुंसामायुःक्षयार्थंमुनयोवदंति चित्रासुहस्तेश्रवणेषुतैलंक्षौरंविशाखा
प्रतिपत्सुवर्ज्यं मूलेमृगेभाद्रपदेचमांसंयोषिन्मघाकृत्तिकसोत्तरासुः नोसंगभक्ष्यैन्नक्षानुमौलिं
भूमिंचसंस्पृशेत् कृनिरुद्धेन्नचोच्छिष्टःपश्येज्ज्योतिषिनाशुचिः अतिथिर्यस्यभग्नाशोगृहात्प्रतिनि
वर्तते सतस्मैदुःकृतंदत्वापुण्यमादायगच्छति तृणानिभूमिरुदकंवाक्चतुर्थीचसूनृता एतान्यपिस
तांगेहेनोछिद्यंतेकदाचन ६० बालोवायदिवावृद्धोयुवावागृहमागतः तस्यपूजाविधातव्यासर्वस्या
भ्यागतोगुरुः चतुःसर्षपयत्तैलंयत्तैलंपुष्पवासितं द्रव्यांतरगतंतैलंनदुष्टंग्रहणेविना मध्यान्हेस्नात

75

प्र·र· नवेलायांयोभक्षेद्दंतधावनं तस्मिन्निराशागछंतिदेवताःपितृभिःसह यावत्स्वस्थमिदंशरीरमरुजंयाव
ज्जरादूरतोयावच्चेंद्रियशक्तिरप्रतिहतायावत्क्षणान्चायुषः आत्मश्रेयसितावदेवविदुषाकार्यःप्रयत्नो ३८
महान्संदीप्तेभवनेतुकूपखननंप्रत्युद्यमःकीदृशः आयुर्वर्षशतंनृणांपरिमितंरात्रौतदर्द्धंगतंतस्यार्द्ध
स्यपरस्यचार्द्धमपरंबालत्ववृद्धत्वयोः शेषंव्याधिवियोगदुःखसहितंसेवादिभिर्नीयतेजीवेवारितरं
गबुद्बुदसमेसौख्यंकुतःप्राणिनां ६५ भर्त्तृहरेरस्य समाःषष्टिर्द्विघ्नामनुजकरिणांपंचचनिशाद्धयानां
द्वात्रिंशत्खरकरभयोःपंचककृतिः विरूपासायुष्कावृषयोःद्वादशस्तुनास्मृतंछागादीनांदशकदेसि
ताःषडूपरमनं वराद्दमिद्धरस्यत्रिशक्तिपरिमितिः तामतारसुवर्णानामर्कषोडशारेवंदुभिः त्रिलो
हरान्वितामुद्रातीव्रदारिद्रनाशिनीः कुशंस्वर्णंसदाधार्यंवह्निमाल्यंनधारयेत् नागंधंविभृयात्पुष्पंना
माधर्वरुक्पयेस्रजं श्रोत्रियांसुभगामग्निंसुभगांधर्मिकंनदीं प्रातरुत्थाययःपश्येदापद्भ्यःसमसुच्यते॥
पापिष्टंदुर्भगामेत्यनग्नमुत्कृतनासिकं आप्रियंप्रातरुत्थायपश्यत्कलिमवाप्नुयात् ७० तिस्रःकोट्यो २८

हेकोटीश्च यानिरोमाणिमानवे तावत्कालंवसेत्स्वर्गंभर्त्तारंयानुमोदते व्यालग्राहीयथाव्यालंविलाउद्ध
रतेवलात् एवंपतिंसमुद्धृत्यनारीस्वर्गेषुमोदते पृथक्चितांसमारुह्यनविप्रागंतुमर्हति भर्त्तुर्देहेनयाया
तितस्यालोकाःसनातनाः अहिंसासर्वेवञ्चनसर्वेभूतानुकंपनं शमोदानंयथाशक्तिर्गर्हस्थोधर्मउच्यते
श्रूयतांधर्मसर्वस्वंश्रुत्वाचैवावधार्यतां आत्मनप्रतिकूलानिपरेषांनसमाचरेत् ७५ भावशुद्धिर्मनुष्ये
स्तकर्त्तव्यासर्वकर्मसु अन्यथाचुंवतेकांताभावेनदुहितान्यथा ७६ शरणागतरक्षार्थंस्त्रीगोद्विजहिता
यश्च स्वाम्यर्थेयस्त्यजेत्प्राणांस्तस्यलोकाःसनातनाः ऋतुस्नातांतुयोभार्यांनैवगच्छतिमूढधीः घोरायां
बालहत्यायांयुज्यतेनात्रसंशयः अदुष्टापतितंभार्यांमूढोयस्तुपरित्यजेत् सप्तजन्मनिसस्त्रीत्वंलभ
तेनात्रसंशयः विश्वासहंताचनरोमीनयोगेप्रपद्यते अन्नापहारीचनरोमूषिकःसंप्रजायते ८०
गूढसाक्षीहथावादीयश्चासदनुशास्तिवै स्तेयोदम्भस्तवःसर्वेतथायेवेदनिंदकाः रौरवंकूटसाक्षीतुयाति
पश्चात्ततोनरः कुंभीपाकंप्रयात्येवमानवोगुरुतल्पगः स्त्रीबालस्वामिमित्रघ्नोगोघ्नविश्वासघातिनः सु
रापोब्रह्महाचौरोयांतेतेसर्वेनारकान् मृगछागादिहंताचवह्निज्वालेनिपात्यते व्रतलोपाश्रमभ्रष्टो

श्र·र· यातिसंदश्मनारके ज्येष्ठंपितृसमंवापिभ्रातरंयोनमन्यते नरकात्सोपिविभ्रष्टः क्रौंचयोनौप्रपद्यते ८५
शूद्रश्चब्राह्मणींगत्वाकृमियोनौप्रपद्यते तस्यामपत्यमुत्पाद्यकाष्ठांतःकीटकोभवेत् अशास्त्रंपुरुषंहत्वा
३१ नरःसंजायतेखरः कृमिस्त्रीवधकर्त्ताचबालहंताचजायते न्यासापहर्त्तातुनरोयमस्यविषयंगतः संसा
राणांशांतंगत्वाकृमियोनौप्रजायते उपस्थितेविवाहेचदानेयज्ञेतथाविभोः समाचरतियोविघ्नंसामृतोजा
यतेकृमिः लवणंचोरयित्वातुचाषकाकःप्रजायते दधिहृत्वाबकश्चापिप्लवोमत्स्यानसंस्कृतान् ९०
चोरयित्वापयश्चापिवलाकासंप्रजायते यस्तुचोरयितुंतैलंपर्युक्षोजायतेनरः अपोहृत्वातुदुर्बुद्धिर्वा
यसोजायतेनरः कांस्यंहत्वातुदुर्बुद्धिर्हारीतोजायतेनरः वर्णान्हृत्वातुपुरुषाम्रतोजायेतवर्हिणः हत्वाव
स्त्राणिरक्तानिजायतेजीवजीवकः नास्तिविद्यासमंचक्षुर्नास्तिसत्यपरंतपः नास्तिरागसमंदुःखंनास्तित्या
गसमंसुखं गुरुशुश्रूषयाविद्यानित्यश्राद्धेचसंततिः गवाढ्यःसाकरीसाभिःस्वर्गभाकुःफलाशनात् ९५ राम
रसानांप्रतिसंहारेसौभाग्यमभिविंदति आमिषःप्रतिसंहारेप्रजाचायुष्मतिर्भवेत् कीर्त्तिर्भवतिदानेनतथारो ३१
ग्यमहिंसका द्विजशुश्रूषयाराज्यंद्विजत्वंचापिपुष्करे ९७ अथदानप्रशंसा दासीयानमलंका

७

रक्षेत्राणिविविधानिच ब्रह्मदेयांसुतांदत्वाप्राप्नोतिभरतर्षभ स्वर्णशृंगैर्विराजितानांगवांसहस्रस्यनरः
प्रदाता प्राप्नोतिपुण्यंदिविदेवलोकेमित्येवमाहुर्मुनिदेवसंघा प्रयच्छंतांयेकपिलांसवत्सांकांस्योपदो
हांकनकाग्रशृंगां तैस्तैर्गुणैःकामदुघास्मभूत्वानरंप्रदातारमुपैतिसांगे यावंतिरोमाणिभवंतिधेन्वास्ता
वत्फलंप्राप्यचगोप्रदाता पुत्रांश्चपौत्रांश्चकुलंचसर्वंससप्तमंतारयतेपरत्राः सदक्षिणांकांचनचारुशृंगां
कांस्योपदोहांद्रविणोत्तरीयां धेनुंतिलानांददतोद्विजायलोकेवसूनांसुलभाभवंति नैवोशिकंसर्वगुणो
पपन्नंददातियश्चैवनरोद्विजाय स्वाध्यायचारित्रगुणान्वितायतस्यात्तुलोकाःपुरुहूतरेषु धूपप्रदा
नेनतथागवांश्चलोकानवाप्नोतिनरोवसूनां स्वर्गीयवैवाहहिरण्यदानंततोविशिष्टंकनकप्रदानं छत्रप्र
दानेनगृहंविशिष्टयानंतत्तोपानहःसंप्रदाने वस्त्रप्रदानेनफलंस्वरूपंगंधप्रदानेसुरभिर्नरःस्यात् स्रग्धू
पगंधान्यनुलेपनानिस्नानानिमाल्यानिचमानवोयः दद्याद्विजेभ्यःसभवेदरोगीतथाभिरूपश्चनरेंद्रलोके
हिरण्यदानगोदानपृथ्वीदानंचमेवच एतानिवैपवित्राणितारयत्यपिदुष्करं १० इतिदानप्रशंसा आ
चाराल्लभतेह्यायुराचाराल्लभतेश्रियं आचारात्कीर्तिमाप्नोतिपुरुषःप्रेत्यचेहच दुराचारोहिपुरुषाने

म.र.
४०

हायुर्विंदतेमहत् तस्मात्कुर्यात्सदाचारं यदीछेद्भूतिमात्मनः अपिपापशरीरस्य आचारोहंत्यलक्षणं
आचारलक्षणोधर्मः सन्तमामरलक्षणाः येनास्तिकानिःक्रियाश्चगुरुशास्त्राभिलंघिनः अधर्मज्ञागताचा
रास्तेभवंतिगतायुषः विशीलाभिन्नमर्यादानित्यंसंकीर्णमैथुनः अल्पायुषोभवंतीहनरानिरयगामि
नः सर्वलक्षणहीनोपिससदाचारवान्नरः श्रद्दधानोनुसूयश्चशतंवर्षाणिजीवति ओष्टमर्दीतृणछे
दीनखखादीचयोनरः नित्योच्छिष्टःशंकसुकोनेहायुर्विंदतेमहत् परदारान्नगंतव्याःसर्ववर्णेषुकर्हिचित्
नहीदृशमनायुष्यंलोकेकिंचिन्नविद्यते यावंतोरोमकूपास्युःस्त्रीणांगात्रेषुनिर्मिताः तावद्वर्षसहस्राणिनरकं
पर्युपासते आर्द्रपादस्तुभुंजीयात्नार्द्रपादस्तुसंविशेत् आर्द्रपादस्तुभुंजानोवर्षाणांजीवतेशतं नैकव
स्त्रेणभोक्तव्यंननग्नःस्नातुमर्हति स्वप्तव्यंनैवनग्नेननचोछिष्टोपिसंविशेत् नपाणिभ्यामुभाभ्यांचकंडू
येदात्मनःशिरः नचाभीक्ष्णंशिरःस्नायीततथास्यायुर्नरिष्यति त्रीन्कृशान्नाववानीयाद्दीर्घमायुर्जिजी
विषु ब्राह्मणांक्षत्रियंसर्प्पंसर्वेह्याशीविषास्त्रयः पंथादेयोब्राह्मणायगोभ्योराजभ्यएवच वृद्धाय
भारतप्तायगर्भिण्येदुर्बलायच नभग्नेनावकीर्णेवाशयनेप्रस्वपंतिच अंतर्द्धानेनसंयुक्तेनवेतिर्य

रा.
४०
८

कुर्याच्चन नदिवामैथुनंगच्छेन्नकंन्यानचबंधकीं नचाज्ञातांस्त्रियंगच्छेत्तथायुर्विदितेमहत् यदिसंयोग
कालेतुपुरुषोरागमोहितः द्विधासमुत्सृजेत्तच्छुक्रंयमकंतत्रजायते दिवसेनैवतंकुर्यायेनरात्रौसुखंसु
ये अष्टमासेष्वतत्कार्यांद्येनवर्षासुखंवसेत् पूर्वेवयसितत्कुर्याद्येनवृद्धःसुखंवसेत् यावज्जीवतितत्कु
र्याद्येनप्रेत्यसुखीभवेत् अष्टौतान्यव्रतघ्नानिआपोमूलफलंपयः हविर्ब्राह्मणकाम्याश्चगुरोर्वचनमौ
षधं विवादकालेरतिसंप्रयोगेप्राणात्ययेसर्वधनापहारे विप्रस्यचार्थेह्यनृतंवदेतपंचाहुतान्याहुरपा
तकानि नित्यक्रोधात्तच्छ्रियंरक्षेत्तपोरक्षेच्चमत्सरात् विद्यांमानापमानाभ्यांआत्मानंतुप्रमादतः सदास्त्रि
यावशायनंसहभोज्यंचवर्जयेत् तुंकारंनामधेयंचज्येष्ठानांपरिवर्जयेत् पायसंकृशरंमांसंपूपानेव
चशष्कुली यांश्चयेनात्मनार्थेहि वृथामांसंनभक्षयेत् अग्नीर्गुरुदारंस्यादसंस्पर्श्यघृणीनृपः स्त्रियः
सेवेतनात्यर्थेमिष्टंभुंजीतनातिमितं काष्ठेवाशंकुभिर्वापिशूलैरश्मभिरेवच येमार्गेनिनरुध्यंतितेवैनिरयगा
मिनः क्षेत्रवृत्तिगृहच्छेदंप्रीतिच्छेदंचयेनरः आशाच्छेदंचकुर्वीततेनरानरकौकसः वचोवेगंमनोवेगंयो
वेगमुदरोद्भवेत् उपस्थवेगंसहतेसःस्वर्गंजायतेनरः क्षमातुल्यंतपोनास्तिसंतोषात्परमंसुखं नचतृष्णा

परोव्याधिर्नचधर्मोदयापरः ज्ञानवृद्धोद्विजातिनांक्षत्रियाणांबलाधिकः वैश्यानांधान्यधनवान्शूद्रा
णामेवजन्मतः दानेनभोगीभवतीमेधावीवृद्धसेवया अहिंसयाचदीर्घायुरितिप्राहुर्मनीषिणः नमस्कार
प्रियोभानुरभिषेकप्रियःशिवः अलंकारप्रियोविष्णुर्ब्राह्मणोभोजनप्रियः १४० इतिश्रीकरणकु० सदाचार
दानप्रशंसास० अथस्त्रीप्रशंसा कोपेदासीकृतेवेश्याभोजनेजननीसमा विपत्तौबुद्धिदात्रीचसाभार्यासैव
दुर्लभा १ साध्वीशीलवतीशुचिःकृतवतीदाक्षिण्ययुक्लज्जावतीपत्नीव्याजपराङ्मुखीस्थिरमतिर्नित्यंप्रिया
लापिनी देवब्राह्मणबंधुपूजनवतीयस्यास्तिभार्यागृहेतस्यार्थेसुतकाममोक्षसुखदापुण्येकृतालभ्यते
सत्यासुनित्यंप्रियदर्शनासुसौभाग्ययुक्तासुगुणान्वितासु वसामिनारीषुपतिव्रतासुकल्याणशीलासुच
लासुदेवी वस्माभावेनसुमनाःसुव्रतासुसमाहिता अनन्यचित्तासुमुखीभर्तुःसाधर्मचारिणी दरिद्रंव्याधि
तंदीनमध्वनापरिकीर्षितं पतिंपुत्रमिवोपास्तेसानारीधर्मभागिनी यानारीप्रियवाग्दत्तायानारीपुत्रिणीभवेत् पू
पतिव्रतापतिप्राणासानारीधर्मचारिणी नकामैथुनभोगेषुनैश्वर्येनसुखेनतथा स्पृहायस्यायथाभर्तुःसाना
रीधर्मभागिनी कल्योत्थानपरानित्यंगुरुशुश्रूषणेरता सुखंमृष्टसमंचैवगोगाकृतविलेपना श्वश्रूश्वशुरयोः

पादौतोषयंतीपतिव्रता मातापितृपरानित्यंयानारीसापतिव्रता पतिर्हिदेवोनारीणांपतिर्बंधुप
तिर्गतिः पत्युर्गतिःसमानास्तिदैवतंचैवयथापतिः १० अथस्त्रीनिंदा स्थानंनास्तिक्षणोनास्तिना
स्तिप्रार्थयितानरः तेननारदनारीणांसतीत्वमुपजायते नलज्जानविनीतत्वंयदाक्षिण्यत्वंनभीरुता
प्रार्थकाभावएवैकः सतीत्वेकारणंस्त्रियः आहारोद्विगुणःस्त्रीणांबुद्धिस्तासांचतुर्गुणा षड्गुणोव्यव
सायश्चकामश्चाष्टगुणःस्मृतः स्त्रियस्त्रयःकामयतेसंनिकर्षंतुगच्छति ईर्षांकुरुतेसेवांनतुमिच्छंतियोषि
तः ५ घृतकुंभसमानारीतप्तांगारसमःपुमान् तस्माद्घृतंचवह्निंचनैकस्थंस्थापयेद्बुधः पितारक्षतिकौ
मारेभर्त्तारक्षतियौवने पुत्रस्तुस्थाविरेभावेनस्त्रीस्वातंत्र्यमर्हति सुरूपंपुरुषंदृष्ट्वाभ्रातरंयदिवासुतं यो
निःक्लिद्यतिनारीणामामपात्रमिवांभसा अनृतंसाहसंमायामूर्खत्वंमतिलोलता अशौचंनिर्दयत्वंच
स्त्रीणांदोषाःस्वभावजाः पलितेषुचवृद्धेषुपुंसकानामकामिता भैषज्यमिवमन्यंतेयदन्यमनसःस्त्रियः १०
शाशिनीवद्दिमार्त्तोनाधर्मार्त्तोनारवाविवे मनोनरमतेस्त्रीणांजराग्रस्तेंद्रियेपतौ स्वातंत्र्यंपितृमंदिरेचव
सतियात्रोछवेसंगतिः गोष्ठीपुरुषसंनिधावनियमोवासोविदेशेतथा संसर्गःपुंश्चलीभिरसकृद्वृत्तेर्निजायक्षतिःप

भा॰र

४२

त्सर्वोद्धकभीर्विर्तंप्रहसनंनाप्रास्यहेतुःस्त्रियः पानंदुर्जनसंसर्गःपत्याचविरहोऽटनं स्वप्नमन्यवासोनारीणांदू
षणानिषट् दुर्ग्राह्यंवचनंतथैववदनंयद्दर्पणांतर्गतंभावःपर्वतसूक्ष्ममार्गविषमःस्त्रीणांनविज्ञायते चित्तं
पुष्करपत्रतोयतरलंविद्वद्भिराशंसितंनारीनामविषांकुरैरिवलतादोषैःसमंवर्द्धिताः नस्त्रीनामप्रियःकश्चि
त्प्रियावापिनविद्यते गावस्त्रीणामिवारण्येप्रार्थयंतिनवंनवं १५ विवादशीलांस्वयमर्थचारिणींपरानु
कूलांबहुपाकथाकिरणीं सुक्रोधिनीमन्यगृहेसुवासिनींत्यजंतिभार्यांदशपुत्रपुत्रिणीं आवर्त्तःसंसयाना
मविनयभवनपत्तनंसाहसानांदोषाणांसंनिधानंकपटशतगृहक्षेत्रमप्रत्ययानं स्वर्गद्वारस्यविघ्नंनरकपु
रमुखंसर्वमायाकरंडंस्त्रीयंत्रंकेनसृष्टंविषममृतमयंप्राणिनांमोहपाशः जल्पंतिसार्धमन्येनपस्यंन्यंसवि
भ्रमंहृद्गतंचिंतयंत्यन्यंनस्त्रीमेकतोरतिः कुलीनारूपवंत्यश्चनाथवंत्यश्चयोषितः मर्यादासुनतिष्ठंतिस
दोषस्त्रीषुनारद समज्ञानावयवतःप्रतिरूपान्वतेस्थितान् पतीनांतरमासाद्यनालंनार्यःप्रतिक्षितुं २०
नासांकश्चिदगम्योस्तिनासांवयसिनिश्चयः विरूपंरूपवंतंवापुमानित्येवभुंजते नभयान्नोप्यनुक्रोशा
न्नार्थहेतोःकथंचनः नज्ञातिकुलसंबंधात्स्त्रियस्तिष्ठंतिभर्त्तृषु माद्यंतिप्रमदाहष्ट्वासुराहष्ट्वानमाद्यति ॥

राम

४२

तस्माद्दृष्टिमदां नारी तस्मात्तां परिवर्जयेत् यौवने भर्तुर्मानानां मृष्टाभरणवाससां नारीणां स्वैरवृत्ता
नां स्पृहयंति कुलस्त्रियः याद्दिशम्ब द्रष्टुं मनोरक्ष्यंते यदि तैः स्त्रियः अपि ताः संप्रसज्जंते कुब्जांधजडवामनैः २५
पंगुष्वपि चरे वृषैर्ये चान्ये कुत्सिता जनाः स्त्रीणामगम्यो लोकेस्मिं नास्ति कश्चिन्महामुने यदि पुंसां गतिर्ब्र
ह्मन् कथंचिन्नोपपद्यते अप्यन्योन्यं प्रवर्तंते न च तिष्ठंति भर्तृषु अलाभात्पुरुषाणां हि भयात्परिजने
स्य च वधबंधभयाच्चैवं स्वयंगुप्ता हि योषितः कामनामपि दातारं कर्तारं मानसांत्वयोः रक्षितारं न म
ष्यंति भर्तारं परमस्त्रियः न कामभोगान्बहुलान्नालंकारार्थसंचयान् तथा हि बहु मन्यंते यथा रत्याप
रिग्रहं ३० प्रकीर्णभांडां च न वेक्ष्यकारिणीं सदा च भर्तुः प्रतिकूलभाषिणीं परस्य वेश्माभिरतामलज्जा
मेवंविधा यां परिवर्जयामि लोलायतासीणवलेहिनां च व्यपेतशौचां कलहप्रियां च निद्राभिभूतां सत
तं शयानामेवंविधां स्त्रीं परिवर्जयामि असद्धर्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो पापोपसोत्तराण्यावे
लज्जां त्यक्त्वा भजत्यसौ ३३ इति श्रीकरणकु० स्त्रीप्रशंसानिंदा समाप्तः अथ तरुमहिमा ८
शकूपसमा वापी दशवापीसमो ह्रदः दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः १ यावद्दिनानि तुलसी रोपिता यद्गृ

प्र·र·
४३

हेवसेत् तावद्वर्षसहस्राणिवैकुंठेसमहीयते एवमेवहियोश्वत्थंरोपयेद्विधिनानरः यत्रकुत्रापिवास्थाने
सगच्छेद्वनंहरे वटवृक्षद्वयंमर्त्योरोपयेद्योयथाविधिः शिवलोकेवसेत्सोपिसेवितस्त्वप्सरोगणैः यस्तु
संरोपयेद्बिल्वंशंकरप्रीतिकारकं तत्कुलेनुसदालक्ष्मीःसंतिष्टेत्पुत्रपौत्रिकी ५ तेनेष्टाबहवोयज्ञास्तेन
दत्तावसुंधरा सततंब्रह्मचारीस्याद्येनधात्रीप्ररोपिता निंबवृक्षंसमारोप्यनरोधर्मविचक्षणः सूर्यलोकं
समासाद्यवसेद्दशायुतत्रयं चतुर्णांप्लक्षवृक्षाणांरोपणंनात्रसंशयः राजसूयश्वयज्ञश्वफलंप्राप्नोति
मानवः पंचाम्ररोपयेद्यस्तुभागेषूपवनेषुच भूतान्भविष्यान्पुरुषान्तारयेत्सचतुर्दश पलाशमना
स्विनःसमरोपयेदेकमेवच ब्रह्मलोकमवाप्नोतिपूज्यतेचामरैःसदा १० उडुंबरद्रुमानयोरोपयेत्स्वभूमे
